नागानन्दम्।

नाटकम्।

राजश्रीहर्षदेवकृतित्वेन प्रसिद्धम्।

कलिकाता फ्रिचर्चइन्ष्टिटिउसनाख्यकलेज

प्रधानसंस्कृताध्यापकेन

श्रीकैलासचन्द्र विद्याभूषणभट्टाचार्य्येण

कृतटीकं अनूदितप्राकृतं प्रकाशितञ्च।

कलिकाता राजधान्याम्।

नूतनवाल्मीकियन्त्रे श्रीउदयचरणपालेन मुद्रितम्।

शकाब्दाः १८०८

PREFACE.

The Nagananda (a drama in five acts) has been selected as one of the text books in Sanskrit for the B. A. Examination by the University of Calcutta.

There is a great difference of opinion as to who may be the authentic author of the drama. Some are of opinion that Dhavaka a poet in the court of Sriharshadeva the king of Kashmire has written the drama and receiving some wealth from the king, celebrated it in his name This is expressly noted in the Kavya Prakasa of Mammata charya :—

Cf. "काव्यं यशसेऽर्थकृते &c. &c.

"कालिदासादीनामिव यशः श्रीहर्षादेर्धावकादीनामिव धनं &c."

Others maintain that the King Sriharshadeva had a great poetical genius, so it is very certain that he has himself written this drama as well as another named Ratnavali :—

Cf. "अत्रान्तरे राजसूनुर्हर्षः सोत्कर्षपौरुषः ।
गुणैर्लेभे प्रकाशत्वमन्यभूपालदुर्लभैः ॥
सोऽशेषदेशभाषाज्ञः सर्वभाषासु सत्कविः ।
कृत्स्नविद्यानिधिः प्राप ख्यातिं देशान्तरेष्वपि ॥"

—Rajatarangini, VII., Chap.

However, it is certain that the two dramas viz. Nagananda and Ratnavali are the works of the same poet, for we find the same sloka in the prologue of the two dramas with the change of one word only (cf. page 6. श्रीहर्षो निपुणः कविः &c. while in the Ratnavali the poet reads वत्स instead of बोधि ।)

As this edition is cheifly intended for the students preparing for the B. A. Examination of the Calcutta University, a full commentary and a translation of prakrits

passages have been added to it by the editor following the method of Mallinatha.

In selecting the readings, the Editor has compared two or three Calcutta Editions and two or three manuscripts of the drama preserved in the library of the Govt. Sanskrit College, Calcutta.

However, he has spared no pains to make this edition most suited to the under graduates of the Calcutta University, but how far he has succeeded in his undertaking, it is for the reading public to judge.

Calcuttta,
October, 1886.

THE EDITOR.

नागानन्दम्।

प्रथमोऽङ्कः।

नान्दी।

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातापि नो रक्षसि।
मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः स कोऽन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बुद्धो जिनः पातु वः (१)॥

प्रणम्य परमानन्दमव्ययं शाश्वतं महः।
नागानन्दं टीक्यते श्रीकैलासचन्द्रशर्मणा॥

तत्र कविः काव्यादौ वक्ष्यमाणोऽर्नमस्क्रिया वस्तुनिर्देशान्यतमस्याट-काद्यस्य सम्प्रदायाविच्छेदाचरितमाशीर्वचनं प्रथमन्तावदुपन्यस्यति ध्यानेति। ध्यानव्याजं ध्यानस्य परमार्थचिन्तायाः व्याजं कैतवं "कपटोऽस्त्रीव्याजदम्भोपधयश्छद्मकैतवे" इत्यमरः, उपेत्य अवलम्ब्य कां अनिर्दिष्टनामानं स्त्रियमिति अध्याहृते चिन्तयसि त्वमिति शेषः, न तवेदं परमार्थध्यानमपि तु कस्या अपि कामिन्या लाभोपायचिन्तनमिति भावः। क्षणं (अत्यन्तसंयोगे द्वितीया) चक्षुरुन्मील्य (चक्षुरित्यत्र द्वित्वाभिप्रायकं जातावेकवचनम्।) अनङ्गशरातुरं नास्ति अङ्गं यस्य हरकोपाग्निभस्मीभूतत्वात् सः कामः तस्य शरैः बाणैरातुरं कातरं इमं समीपागतं जनं (अत्रापि पूर्ववत् बहुत्वाभिप्रायकमेकवचनं) पश्य (प्रार्थनायां लोट्) त्वमिति शेषः, त्राता रक्षकस्त्वमिति शेषः

अपि च ।

कामेनाकृष्य चापं हतपटुपटहावल्गिभिर्मारवीरैः
भ्रूभङ्गोत्कम्पजृम्भास्मितचलितदृशा दिव्यनारीजनेन ।
सिद्धैः प्रह्वोत्तमाङ्गैः पुलकितवपुषा विस्मयाद् वासवेन
ध्यायन् बोधेरवाप्तौ न चलित इति वः पातु दृष्टो मुनीन्द्रः १॥

मोऽस्मान् रक्षसि मदनशरव्यथितचित्ता न चेत् त्वं न रक्षसि तर्हि वयं कं शरणमुपयाम इति भावः । मिथ्याकारुणिकः असि त्वमिति शेषः । बौद्धानां करुणा विश्वजनीना इति सर्वैर्ज्ञायते तवेदृशाचरणदर्शनात् तु प्रसिद्धिः सा त्वयि मिथ्येति उपलभ्यते इति भावः । त्वत्तः निर्द-यतरः नास्ति दया करुणा "कारुण्यं करुणा घृणे" त्यमरः, यस्य सः अय-मनयोरतिशयेन निर्दय इति अधिकनिर्दय इत्यर्थः । अन्यः त्वदितरः पुमान् स कः कोऽपि नास्तीत्यर्थः । मारवधूभिः मारप्रेरितयुवतिभिः सेर्ष्यं सरोषं इति पूर्वोक्तरूपं अभिहितः कथितः बुद्धः तत्त्वज्ञानी जिनः बुद्धावतारविशेषः स तु अर्हन्निति प्रसिद्धः यथा "सर्वज्ञो जितरागादि-दोषस्त्रैलोक्यपूजितः । यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः" इति । तदुक्तं ललितविस्तरे अष्टादशाध्याये "तत्र बोधिसत्त्वमादित एव दुष्करचर्य्यां चरन्तं दशग्रामिकदुहितरः कुमार्य्यं उपतस्थुर्दर्शनाय वन्दनाय पर्युपा-सनाय" चेति । अन्यच्च एकविंशाध्याये "अथ खलु मारः पापी-यान् स्वा दुहितॄरामन्त्रयतेस्म गच्छध्वं यूयं कन्यका बोधिमण्डमुपसंक्रम्य बोधिसत्त्वस्य जिज्ञासां कुरुते"ति । (इन्द्रियजेतृत्वात्तस्य जिन इति संज्ञा) वो युष्मान् पातु रक्षतु । श्रोतृवर्गमुद्दिश्य उक्तम् । अस्मिन् श्लोके शार्दूलविक्रीडितं वृत्तं तल्लक्षणं यथा "सूर्य्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडित"मिति ॥ १ ॥

अपि च अन्यच्च । कामेनेति कामेन कर्त्रा हतपटुपटहावल्गिभिः हतैः ताड़ितैः पटुभिः पटहैः ढक्काभिः आवल्गिभिः स्पर्द्धमानैः मार-वीरैः मारस्य कन्दर्पस्य वीरैः अनुचरवर्गैरित्यर्थः रागद्वेषादिभिरिति

नान्द्यन्ते।

सूत्रधारः। अलमतिविस्तरेण। अद्याहमिन्द्रोत्सवे सब-

यावत् (सहार्थे तृतीया) चापं धनुः तस्य वेधविशेषस्य विकारः तं आकृष्य जिनमनुसन्धित्सुरनेकशः, तदुक्तं "मारश्च भिक्षवः पापीयान् बोधिसत्त्वस्य षड्वर्षाणि दुष्करचर्य्यां चरतः पृष्ठतः समनुबद्धोऽभूदिति" अन्यच्च "कामास्ते प्रथमा सेना द्वितीया ते रतिस्तथा। तृतीया क्षुत्पिपासा ते तृष्णा सेना चतुर्थिका। पञ्चमी स्त्यानमिद्धन्ते भयं षष्ठोनिरुच्यते। सप्तमी विचिकित्सा ते क्रोधम्रक्षौ तथाष्टमी" ति ललितविस्तरेऽष्टादशाध्याये। भ्रूभङ्गोत्कम्पजृम्भास्मितचलितदृशा भ्रुवोर्भङ्गः उत्कम्पः जृम्भा मुखव्यादानं स्मितमीषद्धास्यं "समनाक् स्मित" मित्यमरः, तैः चलिते दृशौ यस्य स तथोक्तेन दिव्यनारीजनेन स्वर्गीयाङ्गनाजनेन कर्त्रा ध्यानभङ्गार्थमुपस्थापितेनेति शेषः, तदुक्तं ललितविस्तरे एकविंशाध्याये "इदं खलुवचनं श्रुत्वा अप्सरसो येन बोधिमण्डो येन च बोधिसत्त्वस्तेनोपसंक्रामन्नुपसंक्रम्य बोधिसत्त्वस्य पुरतः स्थित्वा द्वात्रिंशदाकारां स्त्रीमायामुपदर्शयन्ति स्म" त्यादि। अन्यच्च "परिपूरितचन्द्रनिभाननिका बिम्बसुपक्वनिभाधरिकाः। शङ्खकुन्दहिमशुक्लसुदन्तिकाः प्रेक्ष कान्तरतिलालसिका" इति। प्रह्वोत्तमाङ्गैः प्रह्वाणि उत्तमाङ्गानि शिरांसि येषां ते तथोक्तैः "उत्तमाङ्गं शिरः शीर्ष" मित्यमरः, सिद्धैः देवयोनिविशेषैः कर्तृभिः पुलकितवपुषा पुलकितं जातपुलकं रोमाञ्चितं (इतोऽस्य जाते इति पुलकशब्दात् इतः) वपुः शरीरं यस्य स तथोक्तेन वासवेन इन्द्रेण च कर्त्रा ध्यायन् ध्यानस्थः बोधैः तत्त्वज्ञानैः अवाप्तः प्राप्तः न चलितः विचलितध्यानः जातः इति हेतोः विस्मयात् आश्चर्य्येण (ल्यब्लोपे कर्मण्यधिकरणे इति पञ्चमी) दृष्टः मुनीन्द्रः जिनः "जिनः। षड़भिज्ञो दशबलोऽद्वयवादी विनायकः। मुनीन्द्र" इत्यमरः, वो युष्मान् पातु रक्षतु। अत्रापि पूर्ववच्छार्दूलविक्रीडितं वृत्तम्॥ १॥

हुमानमाहूय नानादिग्देशागतेन राजश्रीहर्षदेवस्य पादपद्मो-

नान्दीति । नान्दी आशीर्वचनयुक्ता वाक् तस्या अन्ते अवसाने । इयं अष्टपदा नान्दी श्लोकद्वयसमाहितत्वादिति । नान्दीलक्षणं यथा "आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥ माङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी । पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत" इति साहित्यदर्पणम् । रङ्गविघ्नोपशान्तये अस्याः कर्त्तव्यता यथा "तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये" इति साहित्यदर्पणम् ।

सूत्रधार इति । सूत्रं नाट्यसाधनं धारयतीति प्रधाननट इत्यर्थः तल्लक्षणं यथा "नाट्योपकरणादीनि सूत्रमित्यभिधीयते । सूत्रं धारयतीत्यर्थे सूत्रधारो मतो बुधै"रिति । अन्यच्च "चतुरातोद्यनिष्णातो नैकभूषासमावृतः । नानाभाषार्थतत्त्वज्ञो नीतिशास्त्रार्थतत्त्ववित् । वेश्योपचारचतुरो धौरेयश्च विचक्षणः । नानागतिप्रकारज्ञो रसभावविशारदः । नाट्यप्रयोगनिपुणो नानाशिल्पकलान्वितः । छन्दोविधानतत्त्वज्ञः सर्वशास्त्रविचक्षणः । अवधारप्रयोक्ता च योक्ता चाप्युपदेशकः । एवं गुणगणोपेतः सूत्रधारो विधीयत" इति । कथयतीति शेषः एवं परत्रापि । अतिविस्तरेण निरतिशयवागाडम्बरेण अलं किमपि साध्यन्नास्तीत्यर्थः (अत्र साधनक्रियापेक्षया करणत्वात् तृतीया तदुक्तं "न केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्य अपि तु गम्यमानापी"ति पाणिनीयाः । बोपदेवीयास्तु "सह वारणसमोनार्थार्थविनापृथङ्नानाद्यै"रिति सूत्रेण वारणार्थयोगे तृतीया) "अलं व्यर्थसमर्थयो"रित्यमरः । अद्य नानादिग्देशागतेन बहुविधस्थानादुपस्थितेन राजश्रीहर्षदेवस्य पादपद्मोपजीविना पादौ पद्मौ इव ताभ्यां उपजीविना तदाश्रयिणेत्यर्थः राजसमूहेन कर्त्रा सबहुमानं सादरं इन्द्रोत्सवे इन्द्रस्योत्सवे पूजनार्थमनुष्ठिते आनन्दव्यापारे, अस्मिन्नुत्सवे इन्द्रध्वजः पूज्यते तत्प्रकारो यथा भाद्रशुक्लद्वादश्यां स्वराज्ये इष्टादिसम्पदर्थं इन्द्रप्रीत्यर्थं राज्ञा ध्वजः स्थाप्यते । तदुक्तं बृहत्संहितायां "ततो नीत्वा

पजीविना राजसमूहेनोक्तः। यत्तदस्मत्स्वामिना श्रीहर्ष-देवेनापूर्ववस्तुरचनालङ्कृतं विद्याधरचक्रवर्त्तिप्रतिबद्धं नागानन्दं नाम नाटकं कृतमस्माभिः श्रोत्रपरम्परया श्रुतं न च प्रयोगतो दृष्टम्। तत्तस्यैव राज्ञः सकलजनहृदयाह्लादिनो बहुमानादस्मासु चानुग्रहबुद्ध्या यथावत् प्रयोगेनाद्य त्वया नाटयितव्यमिति तद्यावदिदानीं नेपथ्यरचनां कृत्वा यथाभिलषितं सम्पादयामि। (परिक्रम्यावलोक्य च) आवर्ज्जितानि च सकलसामाजिकमनांसीति मे निश्चयः १ ॥ यतः

पुरद्वारं केतुं निर्माय तत्रैव। शुक्लाष्टम्यां भाद्रपदे केतुं वेदिं प्रवेशयेत्। एकादश्यां सिते पक्षे यष्टीनामधिवासनम्। अधिवास्य ततो यष्टीर्गन्धद्वारेति मन्त्रकैः। द्वादश्यां मण्डलं कृत्वा वासवं विस्मृतात्मकम्। अच्युतं पूजयित्वादौ शक्रं पश्चात् प्रपूजये" दित्यादि। आहूय अहं उक्तः, किमिति अस्मत्स्वामिना श्रीहर्षदेवेन कर्त्ता इति कविनामकथनं तदुक्तं "तत्र पूर्वं पूर्वरङ्गः सभापूजा ततःपरम्। कथनं कविसंज्ञादेर्नाटकस्याप्यथामुख" मिति साहित्यदर्पणम्। अपूर्ववस्तुरचनालङ्कृतं अपूर्वस्य वस्तुनः रचनया अलङ्कृतं विद्याधरचक्रवर्त्तिप्रतिबद्धं विद्याधराणां देवयोनिविशेषाणां "विद्याधरोऽप्सरो यक्षरक्षो गन्धर्वकिन्नरा" इत्यमरः, चक्रवर्त्ती एकच्छत्रोराजा तेन प्रतिबद्धं नायकत्वेनेति शेषः नागानन्दं नागानां सर्पाणामानन्दो यत्र तत् तथोक्तं नाम यत् नाटकं दृश्यकाव्यविशेषः तल्लक्षणं यथा "नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्। विलासर्द्ध्यादिगुणवत् युक्तं नानाविभूतिभिः ॥ सुखदुःखसमुद्भूतिनानारसनिरन्तरम्। पञ्चाधिका दशपरास्तत्राङ्काः परिकीर्त्तिताः ॥ प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्। दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥ एक एव भवेदङ्गी शृङ्गारो वीर एव वा" इति साहित्यदर्पणम्। कृतं रचितं तत् अस्माभिः श्रोत्रपरम्परया श्रुतं नच प्रयोगतः अभिनयेन दृष्टम्। तस्यैव सकलजनहृदयाह्ला-

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च सिद्धराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः १ ॥

दिनः सर्वजनचित्तामोदकस्य राज्ञः श्रीहर्षदेवस्येत्यर्थः बहुमानात् हेतोः अस्मासु च विषये अनुग्रहबुद्ध्या यथावत् प्रयोगेन यथाशास्त्रं रूपणेन त्वया तत् नाटकं नाटयितव्यं अभिनाययितव्यं कुशीलवैरिति शेषः। तत् तस्मात् यावत् वाक्यालङ्कारे, इदानीं अधुना नेपथ्यरचनां नाम:सज्जां कृत्वा यथाभिलषितं यथेष्टं सम्पादयामि नाटकमभिनेष्या-मीति भावः। परिक्रम्य किञ्चिदग्रसरो भूत्वा अवलोक्य दृष्ट्वा च सभा-मिति शेषः। सकलसामाजिकमनांसि सकलानां सर्वेषां अत्रोपस्थिता-नामित्यर्थः सामाजिकानां सभ्यानां मनांसि आवर्ज्जितानि प्रह्वीकृ-तानि च इति मे मम निश्चयः स्थिरज्ञानं भवतीति शेषः ॥ (१)

कथमिति निश्चेतुं शक्यते अतएवाह यत इति। श्रीहर्षः राजा निपुणः रचनाकुशलः कविः अतएवास्य कृतिर्ज्जनहृदयग्राहिणी भविष्य-तीति भावः। श्रीहर्षस्य कवित्वे प्रमाणं यथा "कालान्तरे राजसूनुर्हर्षः श्रीतूकर्षं पौरुषः। गुणैर्लेभे प्रकाशत्वमन्यभूपालदुर्लभैः। सोऽशेषदेशभाषाज्ञः सर्वभाषासु सत्कविः। कृत्स्नविद्यानिधिः प्राप ख्यातिं देशान्तरेष्वपि" इति राजतरङ्गिण्यां सप्तमे तरङ्गे।' एषा परिषद् सभा (परिषच्छब्देनात्र तत्रस्थपुरुषेषु लक्षणा) गुणग्राहिणी गुणपक्षपातिनी अतएव अभि-नेतृणामुत्साहवर्द्धिका भविष्यतीति भावः। विपर्य्यये तु नीरसः तदा किं कविनैपुण्येन जनानां गुणग्राहित्वेन वा इत्याशङ्क्याह लोके इति लोके भुवने सिद्धराजचरितं हारि मनोहारि च भवतीति शेषः, वयञ्च नाट्ये अभिनयकार्य्ये दक्षा निपुणा भवाम इति शेषः। एकैकमपि वस्तु न तु समवेतमित्यर्थः इह वाञ्छितफलप्राप्तेः इष्टफललाभस्य पदं स्थानं भवतीति शेषः मद्भाग्योपचयात् मम भाग्याधिक्यात् हेतोः अयं उप-

तद्यावदहं गृहं गत्वा गृहिणीमाहूय सङ्गीतकमनुतिष्ठामि । (परिक्रम्य नेपथ्याभिमुखमवलोक्य च) इदमस्मद्गृहम् । यावत् प्रविशामि ॥ (प्रविश्य) आर्य्ये इतस्तावत् (२) ।

(प्रविश्य)

नटी । (साश्रम्) अज्ज इयह्मि मन्दभग्गा । आणवेदु अज्जउत्तो को णिओओ अणुचिट्ठो अदुत्ति (१) ।

---

(१) आर्य्ये इयमस्मि मन्दभाग्या । आज्ञापयतु आर्य्यपुत्रः को नियोगोऽनुष्ठीयतामिति । *

स्थितः सर्वो गुणानां साधकवस्तूनां गणः समष्टिः समुदितः मिलितः इति किं पुनः अवश्यमेवेष्टफललाभो भविष्यतीत्यर्थः । अत्रापि शार्दूलविक्रीडितवृत्तम् । १ ॥

तत् तस्मात् यावत् इति वाक्यालङ्कारे, अहं गृहं गत्वा गृहिणीं प्रियां नटीमिति शेषः आहूय सङ्गीतकं अभिनयमित्यर्थः अनुतिष्ठामि आरभे । परिक्रम्य नेपथ्याभिमुखं नेपथ्यस्य नाटकाद्यभिनयार्थसज्जाभूमेः "नेपथ्यं नाट्यशालायां नेपथ्यं च विभूषणे" इति "अन्तर्जवनिकामाहुर्नेपथ्य" मिति च कोषः । अभिमुखं अवलोक्य दृष्ट्वा च । इदं दृश्यमानं अस्मद्गृहं अस्माकं भवनम् । यावत् प्रविशामि गृहमिति शेषः । आर्य्ये इति नटीसम्बोधनं, तदुक्तं साहित्यदर्पणे " वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्पर" मिति, इतस्तावदागच्छेति शेषः (२) ।

* नटी कथयतीति शेषः । * साश्रं सरोदनं कथयतिक्रियाविशेषणमेतत् । आर्य्य इति सूत्रधारसम्बोधनं मन्दभाग्या दुर्भाग्या अहं इयं उपस्थिता अस्मि । को नियोगोऽभिनयः अनुष्ठीयतां अस्माभिरिति शेषः तत् आर्य्यपुत्रः भवान् आज्ञापयतु कथयतु ।

सूत्र। (नटीमवलोक्य) आर्य्ये नागानन्दे नाटयितव्ये किमिदमकारणमेव रुद्यते (१)।

नटी। अज्ज कधं ण रोदिस्सं। यदो दाव तादो अज्जाए सह थविरभावं जाणिअ अदूरजादणिव्वेदो कुडुम्बभारुव्वहणजोग्गो दाणीं तुमंति हिअए वितक्किअ तवोवणं गदो। (२)

सूत्र। (सनिर्वेदम्) अये कथं मां परित्यज्य तपोवनं यातौ पितरौ। तत् किमिदानीं युज्यते॥ (विचिन्त्य) अथवा कथमहं गुरुचरणपरिचर्य्यासुखं परित्यज्य गृहे तिष्ठामि। कुतः

पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्वर्यं क्रमागतम्।
वनं याम्यहमप्येव यथा जीमूतवाहनः (३)॥

इति निष्क्रान्तौ।

प्रस्तावना (४)।

---

(२) आर्य्ये कथं न रोदिष्यामि। यतस्तावत् तात आर्य्यया सह स्थविरभावं ज्ञात्वा अदूरजातनिर्वेदः कुटुम्बभारोद्वहनयोग्य इदानीं त्वमिति हृदये वितर्क्य तपोवनं गतः। *

आर्य्ये नागानन्दे नाम नाटके इति शेषः नाटयितव्ये आङ्गिकत्वादिना अभिनेतव्ये किमिदं कथं अकारणं रुद्यते त्वयेति शेषः (१)।

* यतस्तावत् यस्मात् हेतोः आर्य्यया श्वश्वा सह तातः श्वशुर इत्यर्थः। स्थविरभावं वृद्धत्वं ज्ञात्वा आत्मन इति शेषः अदूरजातनिर्वेदः अदूरं सम्य-स्येव जातः निर्वेदः विषयवैराग्यमित्यर्थः अयं शान्तरसोत्पन्नः तदुक्तं काव्यप्रकाशे "निर्वेदः स्थायिभावोऽस्ति शान्तोऽपि नवमो रसः" इति। यस्य स तथोक्तः ननु त्वमिदानीं अधुना कुटुम्बभारोद्वहनयोग्यः कुटुम्बानां स्वजनानां पोष्याणामित्यर्थः भारः भरणपोषणादिकः तस्य उद्वहने

निर्वाहे योग्यः समर्थः पोष्यवर्गभरणे मनुः "भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनं । नरकं पीड़ने चास्य तस्माद्यत्नेन तं भरेदिति" । इति हृदये मनसि वितर्क्य निश्चित्य तपोवनं गतः वानप्रस्थाश्रममवलम्बितवान् इत्यर्थः यथा "सुतविन्यस्तपत्नीकस्तया वानुगतो वनं । वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेदिति" याज्ञवल्क्यः ।

अये इति विस्मयसूचकमव्ययं कथं मां परित्यज्य विहाय पितरौ पिता च माता च (पितामात्रेत्येकशेषः) तपोवनं यातौ । तत् तस्मात् इदानीं किं युज्यते कर्त्तुमिति शेषः। अथवा पक्षान्तरे कथमहं गुरुचरणपरिचर्य्यासुखं गुर्व्वोः पित्रोः चरणपरिचर्य्या पादसेवा तस्यां यत्सुखं तत् परित्यज्य गृहे तिष्ठामि न कथमपीत्यर्थः । कुतः

पित्रोरिति । पित्रोर्जनकजनन्योः शुश्रूषां सेवां विधातुं कर्त्तुं क्रमागतं पूर्व्वपुरुषानुक्रमेण आगतं ऐश्वर्य्यं सम्पदं त्यक्त्वा अहमद्यैव न तु दिनान्तरापेक्षा देवो जीमूतवाहनः अनन्तरप्रवेश्यो नायक इत्यर्थः यथा पित्रोश्चरणपरिचर्य्यार्थं त्यक्तभोगसुखः सन् यथा वनमाश्रितः तथा वनं यामि । (३)

इति निष्क्रान्तौ (निष्क्रान्ता च निष्क्रान्तश्च "पुमान् स्त्रियेत्येकशेषः" इति) नटीसूत्रधारौ रङ्गभूमेरिति शेषः । इति प्रस्तावना समाप्ता इत्यर्थः तल्लक्षणं यथा साहित्यदर्पणे "नटी विदूषकोवापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥ चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा" ॥ अत्र सादृश्यवर्णनमाश्रित्य पात्रप्रवेशः कृतः अतएव प्रस्तावनेयमवलगितमिति कथ्यते यथा "यत्रैककत्र समावेशात् कार्य्यमन्यत् प्रसाध्यते । प्रयोगे खलु तज्ज्ञेयं नाम्नाऽवलगितं बुधै"रिति साहित्यदर्पणे । (Cf. Avijnana Sakuntala, "तवास्मि गीतरागेण हारिणा प्रसभं हृतः । एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा" ॥ इति सूत्रधारेण उक्ते दुष्यन्तस्य प्रवेशः ।) (४)

ततः प्रविशति नायको विदूषकश्च ।

नायकः । (सनिर्वेदम्) वयस्य आत्रेय

रागस्यास्पदमित्यवैमि नहि मे ध्वंसीति न प्रत्ययः
कृत्याकृत्यविचारणासु विमुखं को वा न वेत्ति क्षितौ
एवं निन्द्यमपीदमीप्सितफलप्राप्त्यै भवेद्यौवनं
भक्त्या याति यदीत्थमेव पितरौ शुश्रूषमाणस्य मे ॥ (१)

ततः प्रविशति रङ्गभूमिमिति शेषः नायकः धीरोदात्तत्वदिव्यादि-व्यत्वादिगुणविशिष्टः नाटकस्य प्रधानपुरुषत्वेन वर्णनीयः । विदूषकः नायकस्य वयस्यश्च । तल्लक्षणं यथा "शृङ्गारस्य सहायाः विटचेटविदूषकाद्याः स्युः । भक्ता नर्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः । कुसुमवसन्ताद्यभिधः कर्मवपुर्वेशभाषाद्यैः । हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः" इति साहित्यदर्पणम् । नायकः कथयतीति शेषः एवं परत्रापि । सनिर्वेदं सवैराग्यं कथयतिक्रियाविशेषणमिदं । वयस्य सखे आत्रेय इदमस्य नाम । "वसन्तेत्यथवा नाम्ना वाच्यो राज्ञा विदूषक" इति ।

रागस्येति । रागस्य अनुरागस्य आस्पदं स्थानमित्यवैमि जानामि यौवनमिति शेषः ध्वंसि विनाशशीलमिति न हि भवतीति मे मम प्रत्ययो विश्वासो न अपि तु यौवनं विनाशशीलमित्यप्यहं जानामि । कृत्याकृत्यविचारणासु कार्याकार्यविचारेषु इदं सत् इदमसदित्यादिविवेके विमुखं पराङ्मुखमिति को वा जनः क्षितौ पृथिव्यां न वेत्ति जानाति अपि तु सर्व एव जानातीत्यर्थः । एवं ईदृशं निन्द्यं अपि यौवनं भक्त्या पितरौ शुश्रूषमाणस्य सेवमानस्य मे मम यदि इत्थं एव सत्कार्यव्यापृततयैव याति तदा इदं यौवनमित्यर्थः ईप्सितफलप्राप्त्यै ईप्सितस्य इष्टस्य फलस्य स्वर्गादेः प्राप्त्यै प्राप्तये भवेत् । निन्द्यमपीदं सदनुष्ठानविनियोजितं चेत् इष्टफललाभनिदानं स्यात् इति भावः । अत्रापि वृत्तं शार्दूलविक्रीडितम् । (१)

विदू। (सरोषम्) भो वयस्स णं णिव्विसो एव्व तुमं एत्तिअं कालं एदाणं जीवन्तमुआणं कदे इमं ईदिसं वनवासदुक्खं अणुहवन्तो। ता पसीद दाणीं पि दाव गुरुचरणसुस्सूसा णिव्वन्धादो णिअत्तिअ इच्छापरिभोगरमणीअं रज्जसुहं अणुहवीअदु। (१)

नायकः। वयस्य न सम्यक् अभिहितं त्वया। कुतः

तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किन्तथा
यत्संवाहयतः सुखं तु चरणौ तातस्य किं राजके।

---

(१) भो वयस्य ननु निर्विण्ण एव त्वमेतावन्तं कालं एतयोर्जीवन्मृतयोः कृते इदमीदृशं वनवासदुःखमनुभवन्। तत् प्रसीद इदानीमपि तावत् गुरुचरणशुश्रूषानिर्बन्धात् निवृत्य इच्छापरिभोगरमणीयं राज्यसुखं अनुभूयताम्। *

---

* भो वयस्य सखे ननु त्वं एतावन्तं कालं (अत्यन्तसंयोगे द्वितीया) एतयोः जीवन्मृतयोः जीवतोरपि मृतवत् भोगादिभ्यो विरतयोरित्यर्थः पित्रोरिति शेषः कृते निमित्तं (चतुर्थ्यर्थकमव्ययमेतत्) इदं वर्त्तमानं ईदृशं दारुणमित्यर्थः वनवासदुःखं वनवासजनितक्लेशमनुभवन् निर्विण्णः विषण्ण एव भवसीति शेषः। तत् तस्मात् प्रसीद (प्रार्थनायां लोट्) इदानीमधुनापि तावत् गुरुचरणशुश्रूषानिर्बन्धात् पित्रोश्चरणपरिचर्य्याग्रहातिशयात् निवृत्य इच्छापरिभोगरमणीयं इच्छायाः भोगवासनायाः परिभोगेण सम्यक्प्राप्त्या रमणीयं सुखकरं राज्यसुखं अनुभूयतां आस्वाद्यतां त्वयेति शेषः।

सम्यक् न्यायानुगतमित्यर्थः। कुतः कस्मात् इदं ब्रवीमि चेत् शृणु इति चेत् तिष्ठन्निति। पितुः जनकस्य पुरः समीपे तदाज्ञाप्रतिपालनो-

किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरो

रायासः खलु राज्यमुज्झितगुरोस्तन्नास्ति कश्चिद्गुणः॥(१)

विदू। (आत्मगतम्) अहो से गुरुअणसुस्सूसाणुराओ। (विचिन्त्य) भोदु ता एदंपि दाव भणिस्सम्। (प्रकाशं) भो वअस्स णक्खु अहं रज्जसोक्खं ज्जेव्व केवलं उद्दिसिअ एव्वं भणामि अण्णंपि दे करणीअं अत्थि ज्जेव्व। (२)

नायकः। (सस्मितं) वयस्य ननु कृतमेव यत्करणीयम्। पश्य

न्याय्ये वर्त्मनि योजिताः प्रकृतयः सन्तः सुखं स्थापिता

---

(२) अहो तस्य गुरुजनशुश्रूषानुरागः। भवतु तदेतदपि तावत् भणिष्यामि। भो वयस्य न खल्वहं राज्यसुखमेव केवलमुद्दिश्य एवं भणामि। अन्यदपि ते करणीयमस्त्येव।

न्मुखः सन्नित्यर्थः भुवि भूमौ तिष्ठन् यथा भाति शोभते तथा तादृशं किं सिंहासने पितरम् परित्यज्य राजासने तिष्ठन्निति शोभते इति शेषः न कदापीति भावः। तातस्य पितुः चरणौ संवाहयतः सेवमानस्य पुत्रस्येति शेषः यत् यादृशं तु सुखं आनन्दः भवतीति शेषः राजके राज्ये स्थितस्येति शेषः किं तादृशं सुखं भवति न किञ्चिदपीत्यर्थः। गुरोः पितुः भुवनत्रये त्र्यवयवं त्रयं भुवनानां त्रयं तस्मिन् भुक्ते किं धृतिः तुष्टिः "धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिष्वित्य"मरः, न कापीति भावः या असौ धृतिरिति शेषः भुक्तोज्झिते भुक्तं भोगः (नपुंसके भावे क्तः) तस्मात् उज्झिते त्यक्ते भवतीति शेषः। उत्तरवाक्ये यच्छब्दप्रयोगात् पूर्ववाक्ये न तच्छब्दापेक्षा। उज्झितगुरोः त्यक्तपितृकस्य पुत्रस्येति शेषः राज्यं आयासः क्लेशः (अत्र कार्य्यकारणयोरभेदेन निर्देशः) खलु निश्चितं तत्र पुत्रे इत्यर्थः कश्चित् गुणः अस्ति नेति भावः। अत्रापि वृत्तं शार्दूलविक्रीडितम्। (१)

नीतो बन्धुजनस्तथात्मसमतां राज्ये च रक्षा कृता ।
दत्तो दत्तमनोरथाधिकफलः कल्पद्रुमोऽप्यर्थिने
किंकर्त्तव्यमतःपरं कथय वा यत्ते स्थितं चेतसि ॥ (१)

विदू । भो वअस्स अच्चन्तसाहसिओ मदङ्गहदओ दे पडिवक्खो । तस्सिं च समासण्णट्ठिदे दे पधाणामच्चसमधिट्ठिदं पि ण तुए विणा रज्जं सुत्थिरं ति पडिभादि । (२)

---

(२) भो वयस्य अत्यन्तसाहसिको मतङ्गहतकस्ते प्रतिपक्षः । तस्मिंश्च समासन्नस्थिते ते प्रधानामात्यसमधिष्ठितमपि न त्वया विना राज्यं सुस्थिरमिति प्रतिभाति । *

नन्विति सम्बोधने यत् करणीयं कर्त्तव्यं मयेति शेषः तत् कृतमनुष्ठितं पश्य त्वमिति शेषः । न्याय्ये इति । प्रकृतयः अमात्यादयः पौरा वा "प्रकृतिर्गुणसाम्ये स्यादमात्यादिस्वभावयोः । योनौ लिङ्गे पौरवर्गे" इति मेदिनी, न्याय्ये न्यायादनपेते (धर्मपथ्यर्थन्यायादनपेते इति यत्) वर्त्मनि पथि योजिताः स्थापिताः मयेति शेषः । सन्तः सज्जनाः सुखं यथा स्यात्तथा स्थापिता राज्ये इति शेषः, बन्धुजनः स्वजनवर्गः आत्मसमतां स्वतुल्यत्वं प्रधानपदमित्यर्थः नीतः प्रापितः राज्ये उन्नतपददानादिना ते मत्कृता इत्यर्थः राज्ये च रक्षा कृता विहिता शत्रुकृताक्रमणादिभयात् इति शेषः । अर्थिने याचकाय जनाय दत्तमनोरथाधिकफलः दत्तं मनोरथात् कामात् अधिकं फलं येन स तथोक्तः कल्पद्रुमोऽपि अभिलषितार्थोत्पादकः देवद्रुमविशेषः अपि दत्तः याचकेभ्यः तेषां याच्ञाधिकवस्तु दत्तमित्यर्थः । (Cf. Bhattikavya, "कल्पद्रुमा योगपथेन फेनुः वासांसि च द्राघिमवन्त्युदूढ"रिति) अतःपरं अतोऽन्यत् किं कर्त्तव्यमस्तीति शेषः वा अथवा ते तव चेतसि मनसि यत् स्थितं तत् कथय त्वमिति शेषः । अत्रापि वृत्तं शार्दूलविक्रीडितम् । (१)

* अत्यन्तसाहसिकः अतिप्रबलः मतङ्गहतकः कश्चित् राजा ते तव

नायकः। धिङ्मूर्ख मतङ्गो राज्यं हरिष्यतीति शङ्कसे। (१)

विदू। अधइं। (२)

नायकः। यद्येवं तत् किं न स्यात्। ननु स्वशरीरात् प्रभृति सर्वं परार्थमेव मया परिपाल्यते। यत्तु स्वयं न दीयते तत्तातानुरोधात्। तत् किमनेनावस्तुना चिन्तितेन। वरं तातात्रेवानुष्ठिता। आज्ञापितश्चास्मि तातेन। यथा वत्स

---

(२) अथ किम्। *

प्रतिपक्षः शत्रुर्भवतीति शेषः। तस्मिन् मतङ्गे च समासन्नस्थिते अतिनिकटस्थिते ते तव राज्यं प्रधानामात्यसमधिष्ठितं प्रधानसचिवेषु निक्षिप्तभारमपि सत् त्वया विना न सुस्थिरं स्वाधीनस्यम् तिष्ठति इति प्रतीयते इत्यर्थः।

मूर्ख धिक् त्वामिति शेषः मतङ्गो राज्यं ममेति शेषः हरिष्यति ग्रहीष्यति इति शङ्कसे त्वमिति शेषः। (१)

* अथ किं निश्चितमित्यर्थः। स्वीकारार्थमव्ययमिदम्।

यदि एवं ईदृशं त्वदुक्तमित्यर्थः भवेदिति शेषः तत् तदा किं न स्यात् अपि तु सर्वमेव सम्भवेदित्यर्थः। स्वशरीरात् प्रभृति स्वशरीरमारभ्येत्यर्थः सर्वं परार्थमेव मया परिपाल्यते रक्ष्यते मम इत्यामन्त्रणे मम सर्वमेव चेष्टादिकं परहितसाधनार्थमेवेति भावः (Cf. Raghu Vansa, "तं वेधाविदधे नूनं महाभूतसमाधिना। यतो हि सर्वे तस्यासन् परार्थैकफलागुणाः" इति) यत्तु स्वयं न दीयते अर्थिसात् क्रियते इत्यर्थः तत् तातानुरोधात् पितुरनुरोधात् मयि स्थिते पिता स्वयं कल्पो भविष्यतीत्याशयेनैवेत्यर्थः। अनेन त्वदुक्तेनेत्यर्थः अवस्तुना असारेण चिन्तितेन किं किमपि साध्यमस्तीत्यर्थः (गम्यमानसाधनक्रियापेक्षया करण-

जीमूतवाहन बहुदिवसपरिभोगेण स्फीतसमित्कुशकुसुम मुपभुक्तमूलफलकन्दनीवारप्रायमिदं स्थानं वर्त्तते । तदितो मलयपर्व्वतं गत्वा किञ्चित्तस्मिन् निवासयोग्यमाश्रमपदं निरूपयेति । तदेहि मलयपर्वतमेव गच्छावः । (१)

विदू । जं भवं आणवेदि । एदु भवं । (इत्युभौ परिक्रामतः) । (२)

---

(२) यद्भवानाज्ञापयति । एतु भवान् ।

स्यात् तृतीया) ताताज्ञा पित्राज्ञा एव अनुष्ठिता प्रतिपालिता वरं मनाक्प्रिया "देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक् प्रिये" इत्यमरः । तातेन पित्रा कर्त्रा आज्ञापितश्च अस्मि अहमिति शेषः । यथा वत्स जीमूतवाहन इदं अधुना कृतनिवासमित्यर्थः स्थानं बहुदिवसपरिभोगेण बहुकालं व्याप्य भोगादिहेतुना स्फीतसमित्कुशकुसुमं स्फीतानि स्फीतानि समिधः हवनोपयोग्यखदिरादिकाष्ठविशेषाः कुशाः पूजोपकरणतृणविशेषाः कुसुमानि पुष्पाणि च यस्मात् तत्तथोक्तं उपभुक्तमूलफलकन्दनीवारप्रायं मूलानि च फलानि च कन्दानि शस्यमूलानि च सूरणानि वा "कन्दोऽस्त्री सूरणे शस्यमूले जलधरे पुमानि"ति मेदिनी, नीवारास्तृणधान्यानि च ते, उपभुक्ताः तेषां प्रायो बाहुल्यं यस्मिन् तत् तथोक्तं "प्रायो मरणानशने मृत्यौ बाहुल्यतुल्ययोः" रिति मेदिनी (यद्यपि नीवारशब्दस्य बहुच्त्वेन पूर्वनिपात एव युक्तः तथापि 'लक्षणहेत्वोः क्रियायाः' इति सूत्रयता सूत्रकृता स्वयमेव पूर्वनिपातशास्त्रस्य अनैकान्तिकत्वं ज्ञापितमिति परनिपातः कृतः ।) वर्त्तते भवति । तत् तस्मात् इतः अस्मात् स्थानात् मलयपर्वतं गत्वा तस्मिन् पर्वते किञ्चित् अनिर्द्दिष्टनाम निवासयोग्यं वासोपयुक्तं आश्रमपदं आश्रमस्थानं निरूपयेति त्वमिति शेषः । तत् तस्मात् एहि आगच्छ त्वमिति शेषः मलयपर्वतमेव गच्छावः आवामिति शेषः । (१)

विदू। (अग्रतोऽवलोक्य) भो वअस्स पेक्ख पेक्ख एसो क्खु सरसघणचन्दणवणुच्छङ्गपरिमिलणलग्गबहलपरिमलो विमल-तडणिवडणजज्झरिज्झन्तनिज्झरच्छलितसिसिरसीअरासार-वाहो पढमसङ्गमोक्कण्ठिदपिआकण्ठग्गहो विअ मग्ग-परिस्समं अवणअन्तो रोमञ्चेदि पिअवअस्सं मलअमारुदो। (१)

नायकः। (निरूप्य सविस्मयं) अये प्राप्ता एव वयं मलयपर्वतं। (समन्तादवलोक्य) अहो रामणीयकमस्य। तथा हि

माद्यद्दिग्गजगण्डभित्तिकषणैर्भग्नस्रवच्चन्दनः
क्रन्दत्कन्दरगह्वरो जलनिधेरास्फालितो वीचिभिः।

---

(१) भो वयस्य प्रेक्षस्व प्रेक्षस्व एष खलु सरसघनचन्दनवनोत्सङ्गपरि-मिलनलग्नबहलपरिमलो विमलतटनिपतज्झर्झरायमाणनिर्झरोच्छलित-शिशिरशीकरासारवाही प्रथमसङ्गमोत्कण्ठितप्रियाकण्ठग्रह इव मार्ग-परिश्रममपनयन् रोमाञ्चयति प्रियवयस्यं मलयमारुतः। *

---

* भो वयस्य प्रेक्षस्व पश्य एषः इदानीमनुभूयमान इत्यर्थः सरस··· परिमलः सरसं सजलं सगन्धं वा "रसो गन्धरसे जले" इति मेदिनी घनं सान्द्रं "घनं स्यात् कांस्यतालादिवाद्यमध्यमनृत्ययोः। ना मुस्ताब्दौघ-दार्ढ्येषु विस्तारे लोहमुद्गरे। त्रिषु सान्द्रे दृढे चे"ति मेदिनी, यत् चन्दनवनं तस्य उत्सङ्गः मध्यदेश इत्यर्थः तेन यत्परिमिलनं तेन लग्नः बहलः मनोहरः परिमलः सुगन्धः "विमर्द्दोत्थे परिमलो गन्धे जनमनोहरे" इत्यमरः यस्मिन् स तथोक्तः एतेन सौगन्ध्यं सूचितं विमल...वाही विमले निर्मले तटे रोधसि 'कूलं रोधश्च तीरञ्च

पादालक्तकरक्तमौक्तिकशिलः सिद्धाङ्गनानाङ्गतै
दृष्टोऽयं मलयाचलः किमपि मे चेतः करोत्युत्सुकम् ॥ (१)

प्रतीरञ्च तटन्त्रिषु" इत्यमरः, निपतनेन पर्वतात्पातादिति शेषः झर्झरायमाणः (अझर्झरः झर्झरो भवतीति लोहितादित्वात् क्यष् शानच इत्यात्मनेपदम्) विच्छिद्यमानः यः निर्झरः वारिप्रवाहः "उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः" इत्यमरः, तस्मात् उच्छलितानां उद्गतानां (उद्पूर्वात् गल् गतौ इत्यस्मात् कर्तरि क्तः) शिशिराणां शीतलानां शीकराणां अम्बुकणानां "शीकरोऽम्बुकणाः स्मृताः" इत्यमरः, आसारस्य धारासम्पातस्य "धारासम्पात आसारः" इत्यमरः, वाही वाहकः एतेनास्य शैत्यं सूचितं, मलयमारुतः मलयपर्वतवायुः "समीरमारुतमरुज्जगत्प्राणसमीरणाः" इत्यमरः, (मृधातोरौणादिक उत् स्वल्पभ्यासदिति ततः स्वार्थेऽण्) प्रथम...पक्षः प्रथमे सङ्गमे मेलने उत्कण्ठितायाः जातोत्कण्ठायाः प्रियायाः वध्वाः कण्ठपक्षः कण्ठाश्लेषमिव (सोऽपि प्रियं जातपुलकं करोतीति साधर्म्यम्) मार्गपरिश्रमं श्रमपङ्कं शमपनयन् अपहरन् प्रियदयस्य भवतामित्यर्थः रोमाञ्चयति जातपुलकं करोति। (रोमाञ्चशब्दात् तत्करोतीत्यादिना णिच् ततः णाविष्ठवद्भावात् विन्मतोर्लुगिति मतुपो लोपः)

अहो आश्चर्यम् अस्य पर्वतस्य रामणीयकं मनोहारित्वं दृश्यतें इति शेषः (रमणीयशब्दात् "योपधाद्गुरूपोत्तमात् वुञ्" इति वुञ्) तथाहि तमेव वर्णयति माद्यदिति। माद्यतां मदोन्मत्तानां दिग्गजानामैरावतादीनां "ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः" इत्यमरः, गण्डभित्तयः प्रशस्तकपोलाः "गण्डौ कपोलौ" इत्यमरः, तासां कषणैः घर्षणैः (cf. Raghuvansa, "कपोलकण्डूः करिभिर्विनेतुं" मित्यादि) भग्नस्तरुचन्दनः भग्ना अतएव स्रवन्तः क्षरन्तः चन्दनाश्चन्दनद्रुमा यस्मिन् स तथोक्तः कन्दरकन्दरगह्वरः

तदेह्यावारुह्य वासयोग्यं किञ्चिदाश्रमपदं निरूपयावः ॥

विदू। एव्वं करेम्ह। (अग्रतः स्थित्वा) एदु भवं। (१)
(आरोहणं नाटयतः)। *

नायकः। (दक्षिणाक्षिस्पन्दनं सूचयन्) अये

---

(१) एवं कुर्मः। एतु भवान्।

क्रन्दन्तः शब्दायमानाः पक्षिणां काकल्यादिभिरिति शेषः कन्दरेषु गुहासु "दरी तु कन्दरो वास्त्री देवखातबिले गुहा" इत्यमरः, ये गह्वराः निकुञ्जाः "अथ गह्वरम्। गुहागहनदम्भेषु निकुञ्जे तु पुमानय"मिति मेदिनी, ते यस्मिन् स तथोक्तः जलनिधेः समुद्रस्य वीचिभिः तरङ्गैः "भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचि" रित्यमरः, आस्फालितः ताडितः सिद्धाङ्गनानां सिद्धपत्नीनां विहारार्थमागतानामित्यर्थः गतैः गमनैः (हेताविति तृतीया) पाद···भिन्नः पादालक्तकेन प्रसाधनार्थदत्तचरणालोहितद्रवरसविशेषेण रक्ताः लोहिताः मौक्तिकशिलाः स्वभावश्वेता इति शेषः यस्मिन् स तथोक्तः अयं समीपवर्त्ती मलयाचलः मलयपर्वतः दृष्टः सन् भवतीति शेषः मे मम चेतः मनः कामं किमपि अनिर्वचनीयरूपमुत्सुकमुत्कण्ठितं करोति। अत्रापि वृत्तं शार्दूलविक्रीडितम्। (१)

* आरोहणं शैलारोहणं नाटयतः आङ्गिकाभिनयेन कुरुतः विदूषकजीमूतवाहनाविति शेषः।

दक्षिणाक्षिस्पन्दनं सूचयन्। दक्षिणाक्षिस्पन्दनं पुरुषाणां पत्न्यादिशुभलाभसूचकं तदुक्तं शकुनशास्त्रे मातृस्थे "अङ्गदक्षिणभागे तु शस्तं प्रस्फुरणं भवेत्। अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च"इति, अपरञ्च "ओष्ठाभोऽपाङ्गदेशे"इति (Cf. Sakuntala, "शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य। अथवा भवित-

दक्षिणं स्पन्दते चक्षुः फलाकाङ्क्षा न मे क्वचित् ।
न च मिथ्या मुनिवचः कथयिष्यति किं न्विदम् ॥ (१)

विदू। भो वअस्स अवस्समासण्णं दे पिअं णिवेदेदि। (२)

नायकः। एवं नाम यथाह भवान्। (३)

विदू। (विलोक्य) भो वअस्स पेक्ख पेक्ख। एदं क्खु सविसेसघणसिणिद्धपाअवविसोहिअं सुरहिहविग्गन्धगब्भिणुग्गामधूमणिग्गमं अणुव्विग्गसुहणिसण्णसावअगणं तवोवणं विअ लक्खीअदि ॥ (४)

---

(२) भो वयस्य अवश्यमासन्नं ते प्रियं निवेदयति ।

(४) भो वयस्य प्रेक्षस्व प्रेक्षस्व । एतत् खलु सविशेषघनस्निग्ध पादपविशोभितं सुरभिहविर्गन्धगर्भितोद्गामधूमनिर्गमम् अनुद्विग्नसुख-निषण्णश्वापदगणं तपोवनमिव लक्ष्यते । *

श्यानां द्वाराणि भवन्ति सर्वत्र" इति ।) दक्षिणं चक्षुः स्पन्दते कम्पते मे मम क्वचित् कुत्रापि फलाकाङ्क्षा न अस्तीति शेषः । किं नु पृच्छायां "नु पृच्छायां विकल्पे च" इत्यमरः, मुनिवचः मुनिवाक्यं मिथ्या न च इति इदं कथयिष्यति, किं मुनिवाक्यं फलिष्यति इति मन्ये इति भावः । अस्मिन् श्लोके अनुष्टुप् छन्दः तल्लक्षणं यथा "पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । गुरु षष्ठन्तु पादेषु शेषेष्वनियमो मत" इति । (१)

एवं नाम सम्भावनायां "नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने" इत्यमरः, भवता यादृशं कथ्यते अहमपि तथा सम्भावयामीत्यर्थः । (३)

* एतत् खलु दृश्यमानमित्यर्थः खलु वाक्यालङ्कारे "निषेधवाक्यालङ्कारजिज्ञासानुनये खलु" इत्यमरः, तपोवनमिव लक्ष्यते दृश्यते अस्मेति शेषः । अत्र हेतुगर्भविशेषणान्याह सविशेष...पादपम् सविशेषघनाः

नायकः। सम्यगुपलक्षितं। तपोवनमेवैतत्। कुतः

वासोऽर्थं दययेव नातिपृथवः कृत्तास्तरूणां त्वचो
भग्नालक्ष्यजरत्कमण्डलुरजः स्वच्छं पयो नैर्झरं।

अतिसान्द्राः स्निग्धाः मसृणाः आज्यधूमादिलिप्तत्वात्, ये पादपाः वृक्षाः तैः विशोभितं (पुनः) सुरभि···निर्गमम् सुरभिणा घ्राणतर्पणेन "सुरभि-घ्राणतर्पण" इत्यमरः, हविर्गन्धेन गर्भितः युक्तः उद्दामा सर्वतो विसृमरः यः धूमः तस्य निर्गमो यस्मात् तत् तथोक्तं (Cf. Raghuvansa, "अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान्। पुनानं पवनोद्धूतै र्धूमैराहुतिगन्धिभि" रिति।) अनुद्विग्न···गणं अनुद्विग्नाः उद्वेगर-हिताः शान्ताश्रमस्थितत्वात् अतएव सुखनिषण्णाः सुखशयिताः शावक-गणाः यत्र तत् तथोक्तं। (Cf. Sakuntala, "विश्वासोपगमाद-भिन्नगतयः शब्दं सहन्ते मृगाः" इति।)

वास इति। वासश्चेपरिधेयाय अर्थाय इति नित्यसमासः, अथवा वास एव अर्थः प्रयोजनं यस्मिन् तत् इति क्रियाविशेषणं, नातिपृथवः नातिस्थूलाः (नञर्थस्य नशब्दस्य सुपसुपेति समासः) तरूणां वृक्षाणां त्वचः वल्कलानि दययेव करुणया इव (स्थूलवल्कलकर्त्तनादिय-सत्त्वेचा) कृत्ताः तपस्विभिरिति शेषः स्वच्छं निर्मलं नैर्झरं निर्झर-पतितं "उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झर" इत्यमरः, पयः जलं भग्न···रजः भग्नं पतितं अतएव अलक्ष्यमीषद्दृश्यं जरतां जीर्णानां कमण्डलूनां तपस्विजलपात्रविशेषाणां रजः धूलिः यत्र तत् तथोक्तं भवतीति शेषः, क्वचित् कुत्रचित् स्थाने वटुभिः ब्राह्मणकुमारैः त्रुटितो-ज्झिताः आदौ त्रुटिताः छिन्नाः पश्चात् उज्झिताः त्यक्ताः (पूर्वकाले-त्यादिना तत्पुरुषः) मौञ्ज्यः मुञ्जैः शराख्यतृणविशेषैः निर्मिताः मेखलाः रसनाः, तथा च मनुः "मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्या

दृश्यन्ते त्रुटितोज्झिताश्च वटुभिर्मौञ्ज्यः क्वचिन्मेखला नित्याकर्णनया शुकेन च पदं साम्नामिदम्पठ्यते ॥ (१)

तदेहि प्रविश्य अवलोकयावः। (प्रवेशं नाटयतः) ॥

नायकः। (सविस्मयं विलोक्य) अहो नु खलु मुदित-मुनिजनप्रविचार्य्यमाणसन्दिग्धवेदवाक्यविस्तरस्य पठद्वटु-च्छिद्यमानार्द्रार्द्रसमिधस्तापसकुमारिकापूर्य्यमाणबालवृक्षाल-बालस्य प्रशान्तरमणीयता तपोवनस्य। (२)

इह हि।

मधुरमिव वदन्तः स्वागतं भृङ्गशब्दै-
र्नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः।

विप्रस्य मेखला" इत्यादि, दृश्यन्ते। शुकेन पक्षिविशेषेण च नित्या-कर्णनया नियतश्रवणेन हेतुना इदं अधुना श्रूयमाणमित्यर्थः साम्नां सामगीतानां पदं अंशविशेषः पठ्यते उच्चार्य्यते। अत्रापि वृत्तं शार्दूलविक्रीड़ितम्। (१)

अहो इत्याश्चर्य्ये नु पृच्छायां खलु वाक्यालङ्कारे मुदित···विस्तरस्य मुदितैः हृष्टैः मुनिजनैः कर्त्तृभिः प्रविचार्य्यमाणः वितर्क्यमाणः सन्दिग्धानां संशयितार्थानां वेदवाक्यानां विस्तरः प्रपञ्चः यस्मिन् तत् तथोक्तस्य पठद्···समिधः पठद्भिः वेदादिकमिति शेषः वटुभिः मुनिकुमारकैः छिद्यमानाः यथाप्रमाणमित्यर्थः आर्द्रार्द्राः सजलाः समिधः होमोपकरणकाष्ठविशेषाः यस्मिन् तत् तथोक्तस्य तापस···आलवालस्य तापसकुमारिकाभिः मुनिकन्याभिः पूर्य्यमाणं जलेनेति शेषः बालवृक्षस्य क्षुद्रतरोः आलवालं मृत्तिकादिनिर्मितं मूलवेष्टनं "स्यादालवालमावाल"मित्यमरः, यस्मिन् तत् तथोक्तस्य (Cf. Raghuvansa, "सेकान्ते मुनिकन्याभि स्तत्क्षणोज्झितवृक्षक"मिति।) तपोवनस्य प्रशान्तरमणीयता प्रशान्ता शमप्रधाना रमणीयता मनोहारित्वं वर्त्तते इति शेषः। (२)

मम ददत इवार्घं पुष्पवृष्टिं किरन्तः
कथमतिथिसपर्य्यां शिक्षिताः शाखिनोऽपि ॥ (१)

तन्निवासयोग्यमिदं तपोवनम्। मन्ये भविष्यतीह वसतामस्माकं निर्वृतिः। (२)

विदू। भो वअस्स। किं क्खु एदे ईसिवलिअकन्धरा निच्चलमुहोसरन्तदरदलिअदब्भकवला समुण्णामिददिण्णेकण्णा सुहनिमोलिदलोअणा आअण्णन्ता विअ हरिणा लक्खीअन्ति। (३)

---

(३) भो वयस्य किं खल्वेते ईषद्वलितकन्धरा निश्चलमुखापसरदर्द्धदलितदर्भकवलाः समुन्नमितदत्तैककर्णाः सुखनिमीलितलोचना आकर्णयन्त इव हरिणा लक्ष्यन्ते। *

मधुरमिति। भृङ्गशब्दैः भृङ्गाणां भ्रमराणां शब्दैः गुञ्जितैः मधुरं श्रोत्रहारि स्वागतं शोभनमागतमिति वाक्यमिव वदन्तः कथयन्तः अमी पुरोवर्त्तिनः वृक्षाः फलनम्रैः फलभरावनतैः शिरोभिः मस्तकैः नतिं नमस्कारमिव कुर्वते। पुष्पवृष्टिं किरन्तः विक्षिपन्तः मम महार्घ्यं पूजोपकरणविशेषं ददतः इव सन्तः कथं शाखिनः वृक्षा अपि अतिथिसपर्य्यां अतिथिपूजां "पूजानमस्यापचितिः सपर्य्यार्चार्हणाः समा" इत्यमरः, शिक्षिताः मुनिभिरिति शेषः। अत्र मालिनीवृत्तं तल्लक्षणं यथा "ननमयययुतेयं मालिनी भोगिलोकै" रिति। (१)

मन्ये तर्कयामि अहमिति शेषः। इह अत्र तपोवने वसतां अस्माकं निर्वृतिः परमानन्दो भविष्यति। (२)

* एते अपरस्थिताः ईषद्वलितकन्धराः कं मस्तकं धरतीति कन्धरः ग्रीवा ईषद्वलिता वक्रीभूता इत्यर्थः कन्धरा येषां ते तथोक्ताः निश्चल···कवलाः

नायकः । (कर्णं दत्त्वा) सखे सम्यगुपलक्षितम् ।

तथा हि

स्थानप्राप्त्या दधानम्प्रकटितसमतामन्द्रतारव्यवस्था
निर्ह्रादिन्या विपञ्च्या मिलितमलिरुतेनेव तन्त्रीस्वरेण ।

निश्चलेभ्यः निद्राणत्वादित्यर्थः मुखेभ्यः अपसरन्तः बहिः पतन्तः ईषद्वलिता ईषच्चर्विताः "दराव्ययं मनागर्थे" इति मेदिनी, दर्भकवलाः कुशग्रासा येषां ते तथोक्ताः, सस्तम्भितदत्तैककर्णाः सस्तम्भितः जडीकृतः दत्तः निवेशितः एकः कर्णः यैः ते तथोक्ताः, सुख…लोचनाः सुखं यथा स्यात्तथा निमीलितानि मुद्रितानि लोचनानि येषां ते तथोक्ताः अतएव आकर्णयन्तः शृण्वन्तः गीतमिति शेषः इव हरिणा मृगाः लक्ष्यन्ते दृश्यन्ते अस्माभिरिति शेषः ।

स्थानेति । स्थानप्राप्त्या हृत्कण्ठमूर्द्धस्थानेभ्यः उत्पन्नत्वात् प्रकटित…व्यवस्थाः प्रकटिताः स्फुटीकृता समता कण्ठोत्पन्नस्वरत्वं स्वराणां मध्यत्वमित्यर्थः मन्द्रः हृदयोत्पन्नस्वरः स्वराणां गाम्भीर्यमित्यर्थः तारः मूर्द्धोत्पन्नस्वरत्वं स्वराणामुच्चैस्त्वमित्यर्थः तेषां व्यवस्थाः पारिपाट्यं (तदुक्तं सङ्गीतसमयसारे "त्रीणि स्थानानि हृत्कण्ठशिरांसीति समाख्यतः । एकैकमपि तेषु स्यात् द्वाविंशतिविधायुतम् । द्वाविंशतिविधोमन्द्रो ध्वनिः सञ्जायते हृदि । यथोत्तरमसौ तारो वीणायामधरोत्तरम् ॥ स एव द्विगुणो मध्यः कण्ठस्थाने यथाक्रमम् । स एव मस्तके तारः स्थानमध्याद् द्विगुणः क्रमा"दिति । तथा च सङ्गीतदर्पणम् "हृदि मन्द्रो गले मध्यो मूर्द्ध्नि तार इति क्रमात् । द्विगुणः पूर्वपूर्वस्मादयं स्यादुत्तरोत्तर" इति ।) दधानं धारयत् निर्ह्रादिन्या मधुरशब्दविशिष्टया "स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वना" इत्यमरः, विपञ्च्या वीणायाः "वीणा तु वल्लकी विपञ्ची" त्यमरः, तन्त्रीस्वरेण

एते दन्तान्तरालस्थिततृणकवलच्छेदशब्दं नियम्य
व्याजिह्माङ्गाः कुरङ्गाः स्फुटललितपदं गीतमाकर्णयन्ति ॥१॥

विदू। भो वअस्स को उण एस तवोवणे गाअदि। (२)

नायकः। यथैताः कोमलाङ्गुलितलाभिहन्यमानाः स्फुटं क्वणन्ति तन्त्र्यस्तथा काकलीप्रधानं गीयत इति तर्कयामि। (अङ्गुल्यपेक्षामतो निर्दिशन्) अस्मिन्नायतने देवतामाराधयन्ती काचिद्दिव्या योषिदुपवीणयति। (३)

---

(२) भो वयस्य कः पुनरेषः तपोवने गायति।

तन्त्र्युत्पञ्चमषड्जादिस्वरैः "निषादर्षभगान्धारषड्जमध्यमधैवताः। पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः" इत्यमरः, अलिरुतेन भ्रमरगुञ्जितेनेव मिलितं मिश्रितं एकीभूतं (अनेन गायकस्य कण्ठस्वरनैपुण्यं सूचितं) स्फुटललितपदं स्फुटानि सुव्यक्तानि ललितानि सुन्दराणि "ललितं त्रिषु सुन्दरम्" इत्यमरः, पदानि यस्मिन् तत् तथोक्तं गीतं कर्म गानं "गीतं गानमिमे समे" इत्यमरः, व्याजिह्माङ्गाः व्याजिह्मानि वक्राणि सुखश्रयितत्वादित्यर्थः अङ्गानि येषां ते तथोक्ताः एते कुरङ्गा मृगाः दन्त...शब्दं दन्तानामन्तराले मध्ये स्थितः यः तृणकवलः तृणग्रासः तस्य छेदशब्दं चर्वणशब्दं रोमन्थोत्पन्नशब्दमिति यावत् नियम्य निरुध्य आकर्णयन्ति शृण्वन्ति। अत्र स्वभावोक्तिरलङ्कारः तदुक्तं "स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णन"मिति। अत्र स्रग्धरावृत्तं तल्लक्षणं यथा "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेय"मिति। (१)

यथा एताः तन्त्र्यः कोमलाङ्गुलितलाभिहन्यमानाः कोमलैः अङ्गुलितलैः करपैः अभिहन्यमानाः ताड्यमानाः सत्यः स्फुटं सुप्रकटितस्वरूपं स्वनैरिति यावत् क्वणन्ति शब्दायन्ते "निक्वाणो निक्वणः क्वाणः क्वणः .

विदू। भो वअस्स एहि अह्मे वि देवदाअदनं पेक्खह्म ॥(१)

नायकः। वयस्य साधूक्तं खलु भवता। वन्द्याः खलु देवताः। (उपसर्पन् सहसा स्थित्वा)। वयस्य कदाचित् द्रष्टुमनर्होऽयं जनो भवति। तदावां तमालगुल्मान्तरितौ पश्यन्तावसरं प्रतिपालयावः॥ (तथा कुरुतः)। (२)

(ततः प्रविशति भूमावुपविष्टा वीणामवादयन्ती मलयवती चेटी च)। (३)

---

(१) भो वयस्य एहि आवामपि देवतायतनं प्रेक्षावहे।

क्वणनमित्यपि। वीणायाः क्वणिते" इत्यमरः, तथा तर्कयामि मन्ये अहमिति शेषः काकलीप्रधानं काकली स्वरविशेषः एव प्रधानं यस्मिन् तत् यथा स्यात्तथा गीयते इति, काकलीलक्षणं यथा "यदा निषादः संप्राप्य श्रुतिद्वयं समाश्रयेत्। षड्जस्यैव काकलीति तदासौ कथ्यते बुधै"रिति सङ्गीतदर्पणम्। अस्मिन् पुरःस्थिते आयतने मन्दिरे देवतामाराधयन्ती पूजयन्ती काचित् अनिर्दिष्टनामा दिव्या स्वर्गीया योषित् स्त्री "स्त्रीयोषिदबले"त्यमरः उपवीणयति वीणया उपगायति (वीणाशब्दात् उपगायतीत्यर्थे णिच् ततो लट्।) (१)

अयं मन्दिरस्थः जनः द्रष्टुमस्माभिरिति शेषः अनर्हः अयोग्यः स्यात् परदारदर्शनस्य निषिद्धत्वादिति भावः "नेक्षेत परकामिनी"मिति शास्त्रात्, तत् तस्मात् आवां तमालगुल्मान्तरितौ तमालस्य स्वनामख्यातस्य वृक्षस्य गुल्मैः स्तम्बैः "गुल्मः सेनाघट्टभिदोः स्तम्बारक्षाप्लीहभिदोः। स्तम्बे" इति मेदिनी, अन्तरितौ व्यवहितौ सन्तौ अवसरं दर्शनस्येति शेषः पश्यन्तौ अन्विष्यन्ताविस्यर्थः प्रतिपालयावः प्रेक्षावहे। (२)

मलयवती नायिका। चेटी किङ्करी सहचर्यं यथा "शृङ्गारसहाया

नायिका । (गायति) ।

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ।
अभिवाञ्छितम्प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥ १ ॥

विटचेटशकाराद्याः स्मृः । उत्तमाः पीठमर्द्दाद्या मध्यौ विटविदूषकौ । तथा शकारचेटाद्या अधमाः परिकीर्त्तिताः । ताम्बूलाक्तं दशनमसकृत् दर्शयन्तीह चेटी”ति साहित्यदर्पणम् । (३)

उत्फुल्लेति । उत्फुल्ल...द्युते उत्फुल्लानां विकसितानां “प्रफुल्लोत्फुल्लसंफुल्लव्याकोषविकचस्फुटा” इत्यमरः, कमलानां पद्मानां ये केसराः किञ्जल्काः “ केसरं हिङ्गुले क्लीबं किञ्जल्के न स्त्रिया”मिति मेदिनी, तेषां ये परागाः रजांसि “ परागः सुमनोरज ” इत्यमरः, तद्वत् गौरी हरिद्राभा “ पीतो गौरो हरिद्राभ ” इत्यमरः, द्युतिः कान्तिः यस्याः सा तत्सम्बुद्धौ “ शोभाकान्तिर्द्युतिश्छवि”रित्यमरः भगवति षड़ैश्वर्यशालिनि गौरि दुर्गे “ गौरीकाली हैमवतीश्वरा । शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला । अपर्णा पार्वती दुर्गे”त्यमरः, युष्मत्प्रसादेन करुणेन हि निश्चितं “ हि हेतावधारणे” इत्यमरः, मम अभिवाञ्छितं मनोरथः “ वाञ्छाभिप्सा मनोरथ ” इत्यमरः, प्रसिध्यतु सफलं भवतु । अत्र आर्य्या नाम मात्रावृत्तं तल्लक्षणं यथा “ लक्ष्मैतत् सप्तगणा गोपेता भवति नेह विषमे जः । षष्ठोऽयञ्च न लघुवा प्रथमार्द्धे नियतमार्य्यायाः ॥ षष्ठे द्वितीयलात् परके न्ले मुखलाच्च सयतिपदनियमः । चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः ” । इति छन्दोमञ्जरी । अपरञ्च “ यस्याः पादे प्रथमे द्वादशमात्रा स्थितास्तृतीयेऽपि । अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्ये”ति श्रुतबोधः । इयं गाथेति विकल्पेन कथ्यते यथा “ पढमं बारह मत्ता बीये अट्ठारहेण संजुत्ता । जह पढमं तह तीयं दहपञ्चविभूसिया गाहा ” इति । (१)

गायकः। (कर्णं दत्त्वा)। वयस्य अहो गीतमहो वाद्यं।

व्यक्तिर्व्यञ्जनधातुना दशविधेनाप्यत्र लब्धामुना
विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधायं लयः।
गोपुच्छाप्रमुखाः क्रमेण यतयस्तिस्रोऽपि सम्पादिता
स्तत्त्वाद्यानुगताश्च वाद्यविधयः सम्यक् त्रयो दर्शिताः॥ १॥

व्यक्तिरिति। अत्र अमुना गीतेन कर्त्रा दशविधेन दशप्रकारेण व्यञ्जनधातुना स्फुटीकरणोपयोगिगीतगुणविशेषेण व्यक्तिः प्रकाशः लब्धा प्राप्ता, यथा "व्यक्तादयो दशगुणा गीतेऽस्मिन् परिकीर्त्तिताः। तत्र व्यक्तं स्फुटतराक्षररागपदस्वरैः। पूर्णं पूर्णाङ्गगमकं प्रसन्नं प्रकटार्थकं। सुकुमारं कण्ठभवं त्रिस्थानोत्थमलङ्कृतं॥ ग्रामवर्णलयस्थानं समं श्रीणादिमण्डितं। कण्ठध्वन्येकतायुक्तं सुरक्तमभिधीयते॥ श्लोकश्च द्रुतमध्यादौ श्लक्ष्णत्वे श्लक्ष्णमुच्यते। उच्चैरुच्चारणादुक्तं विकृष्टं मधुरं पुनः। लावण्यपूर्णनिर्दोषं सारवज्जनरञ्जक"मिति सङ्गीतरत्नाकरः। द्रुतमध्यलम्बितपरिच्छिन्नः द्रुतश्च मध्यश्च लम्बितं विलम्बितश्च तैः परिच्छिन्ना विभक्ताः त्रिधा त्रिप्रकारेण अयं लयः गीतवाद्ययोः साम्यं "तालः कालक्रियामानं लयः साम्य"मित्यमरः, लयस्थानविवर्जनं गायकस्य षड्विंशदोषान्तर्गतदोषविशेषः यथा "वर्ज्जितं भीतमुत्तं च अव्यक्तमनुनासिकं। काकस्वरः शिरःकम्पो लयस्थानविवर्ज्जितं विस्वरं शिरसश्चैव विश्लिष्टं विषमाहतं। व्याकुलं तालहीनञ्च गानदोषाश्चतुर्दश" इति सङ्गीतदामोदरः, गोपुच्छाप्रमुखाः गोपुच्छाद्याः तिस्रोऽपि यतयः लयप्रवृत्तिनियमाः क्रमेण यथाविधि सम्पादिता दर्शिता इत्यर्थः, तदुक्तं आञ्जनेयेन "लयप्रवृत्तिनियमो यतिरित्यभिधीयते। समा स्रोतोगता चान्या गोपुच्छा त्रिविधेति सा॥ द्रुतमध्यविलम्बैः स्याद्गोपुच्छा द्रुतमध्यभाक्" इति। तत्त्वाद्यानुगताश्च तत्त्वं विलम्बितमाद्यं येषां

चेटी । (सप्रणयम्) भट्टिदारिए चिरं क्खु वादअन्तीए कुदो ण परिस्समो अग्गहत्थाणं । (१)

नायिका । (साधिक्षेपं) हञ्जे कुदो मे देवीए पुरदो वीणं वादअन्तीए अग्गहत्थाणं परिस्समो । (२)

चेटी । भट्टिदारिए णं भणामि किं एदाए णिक्करुणाए पुरदो वाइदेण । जा एत्तिअं कालं कअआअणदुक्करेहिं णिअमोववासणेहिं आराधअन्तीए अज्जवि ण दे पसादं दंसेदि । (३)

---

(१) भर्तृदारिके चिरं खलु वादयन्त्याः कुतो न परिश्रमोऽग्रहस्तानाम् । *

(२) हञ्जे कुतो मे देव्याः पुरतो वीणां वादयन्त्या अग्रहस्तानां परिश्रमः । †

(३) भर्तृदारिके ननु भणामि किमेतस्या निष्करुणायाः पुरतो

तानि तयोक्तानि तैः अनुगता युक्ता इत्यर्थः लयः वाद्यविषयः "विलम्बितं द्रुतं मध्यं तत्त्वमोघघनं क्रमादि"त्यमरः, सम्यक् यथाशास्त्रं दर्शिताः ॥ अत्र शार्दूलविक्रीडितवृत्तम् । (१)

* भर्तृदारिके राजपुत्रीसम्बोधनमिदं "वाच्या प्रकृतिभी राज्ञः कुमारी भर्तृदारिका" इति, चिरं बहुक्षणं वादयन्त्या वीणामिति शेषः तवेति शेषः; खलु वाक्यालङ्कारे, कुतः कथं अग्रहस्तानां अङ्गुल्यग्राणामित्यर्थः परिश्रमः क्लान्तिर्न भवतीति शेषः ।

† हञ्जे इति चेटीसम्बोधनसूचकमव्ययं "हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रती"त्यमरः ।

विदू । कसञ्चा क्खु एसा किं ण पेक्खह्य । (१)

नायकः । को दोषः । निर्दोषदर्शनाः कन्यका भवन्ति ।

वादितेन । या एतावन्तं कालं कन्यकाजनदुष्करैर्नियमोपासनैराराध-यन्त्या अद्यापि न ते प्रसादं दर्शयति । *

(१) कन्यका खवेषा । किं न प्रेक्षावहे । †

---

* ननु इति प्रश्ने "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरः, भणामि कथयामि अहमिति शेषः । 'निष्करुणायाः दयारहितायाः एतस्याः देव्या इत्यर्थः पुरतः समीपे वादितेन वादनेन (नपुंसके भावे क्तः) किं किमपि साध्यमस्तीत्यर्थः । या देवीत्यर्थः एतावन्तं दीर्घ-मित्यर्थः कालं (अत्यन्तसंयोगे द्वितीया) कन्यकाजनदुष्करैः कन्यका-जनेन (एतेन कौमारावस्थायामपि त्वं अर्चितम्) दुष्करैः दुःखेन क्रियन्ते अनुष्ठीयन्ते इति नियमोपासनैः व्रतप्रार्थनादिभिः "नियमो मन्त्रणा-याञ्च प्रतिज्ञानिश्चये व्रते" इति मेदिनी, आराधयन्त्याः पूजयन्त्याः ते तव (विवक्षया षष्ठी) अद्यापि प्रसादं अभिवाञ्छितसिद्धिरूपमित्यर्थः, न दर्शयति ।

† कन्यका कुमारी अकृतोद्वाहेत्यर्थः "कन्या कुमारी" त्यमरः, खलु निश्चितं एषा भवतीति शेषः । किं कथं न प्रेक्षावहे पश्यावः आवा-मिति शेषः । एषा न परदाराः अतः अस्या दर्शने न दोष इति भावः ।

को दोषः दर्शने इति शेषः न कोऽपीति भावः । कन्यकाः कुमार्य्यः निर्दोषदर्शनाः निर्दोषं न प्रत्यवायजनकं दर्शनं यासां ताः तथोक्ताः भवन्ति । कालभावसम्भवात् कालः कन्यकाकालः भावः स्त्रीस्वभावः "भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु" इति मेदिनी, ताभ्यां सम्भवात् साध्व-सात् भयात् (हेताविति पञ्चमी) "भीतिर्भीः साध्वसंभय" मित्य-

किन्तु कदाचिदस्मान् दृष्ट्वा कालभावसुलभात् साध्वसान्न चिरमिह तिष्ठेत्। तदनेनैव तमालजालान्तरेण पश्याव: ॥१॥

विदू। एव्वं करेम्ह। (उभौ पश्यतः)। (२)

विदू। (दृष्ट्वा सविस्मयं) भो वअस्स पेक्ख पेक्ख। अच्चरिअं। ण केवलं वीणाविण्णाणेण्ण सुहं करेदि। जाव इमिणा वीणाविण्णाणाणुरूवेण रूवेण वि अच्छीणं सुहं उप्पादेदि। का उण एसा। किं दाव देवी। आहो णाअकण्णआ। आहो विज्जाहरदारिआ। आहो सिद्धकुलसम्भवेत्ति। (३)

---

(२) एवं कुर्वः।

(३) भो वयस्य प्रेक्षस्व प्रेक्षस्व। अहो आश्चर्यम्! न केवलं वीणाविज्ञानेनैव सुखं करोति। यावत् अनेन वीणाविज्ञानानुरूपेण रूपेणापि अक्ष्णोः सुखमुत्पादयति। का पुनरेषा। किं तावत् देवी। आहोस्वित् नागकन्यका। आहोस्वित् विद्याधरदारिका। आहोस्वित् सिद्धकुलसम्भवेति। *

मरः, चिरं इह अत्र न तिष्ठेत् (सम्भावनायां लिङ्) तत् तस्मात् अनेन तमालजालान्तरेण तमालजालेन तमालवृक्षवृन्देन "जालं गवाक्ष आनाये क्षारके दम्भवृन्दयो"रित्यमरः, यत् अन्तरं व्यवधानं तेन "अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये" इति मेदिनी, पश्याव आवामिति शेषः। (१)

* नागकन्यका नागस्य पातालस्थजातिविशेषस्य कन्यका। आहो इति विकल्पे "आहो उताहो किमुतविकल्पे" इत्यमरः, सिद्धविद्याधरादयः देवयोनिविशेषाः "विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" इत्यमरः।

नायकः। (सस्पृहमवलोकयन्) वयस्य केयमिति नावगच्छामि। एतत् पुनरहं जानामि॥

स्वर्गस्त्री यदि तत् कृतार्थमभवच्चक्षुःसहस्रं हरे-
र्नागी चेन्न रसातलं शशभृता शून्यं मुखेऽस्याः स्थिते।
जातिर्नः सकलान्यजातिजयिनी विद्याधरी चेदियं
स्यात् सिद्धान्वयजा यदि त्रिभुवने सिद्धाः प्रसिद्धास्ततः॥१॥

स्वर्गस्त्रीति। इयं यदि स्वर्गस्त्री दिव्याङ्गना स्यादिति शेषः तत् तदा हरेरिन्द्रस्य "यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु" इत्यमरः, चक्षुःसहस्रं चक्षुषां नेत्राणां सहस्रं कृतार्थं कृतः फलितः अर्थः प्रयोजनं यस्य तत् तथोक्तं अभवत् भूतम्। नागी नागकन्या चेत् तदा अस्याः मुखे स्थिते सति रसातलं पातालं "अधोभुवनपातालबलिसद्मरसातलम्" इत्यमरः शशभृता चन्द्रेण न शून्यं (अत्र मुखेन चन्द्रस्य भेदेऽप्यभेदकल्पनादतिशयोक्तिः तल्लक्षणं यथा "सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते। भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्ययौ। पौर्वापर्यात्ययः कार्यहेत्वोः सा पञ्चधा ततः" इति साहित्यदर्पणम्।) इयं विद्याधरी चेत् यदि स्यादित्यर्थः तदा नः अस्माकं जातिः, अस्य विद्याधरजातित्वादियमुक्तिः सङ्गच्छते (cf. प्रस्तावना। सूत्रधारः। यत्तदस्मत्स्वामिना...विद्याधरचक्रवर्त्ति-प्रतिबद्धं नागानन्दं नाम &c.।) सकलान्यजातिजयिनी सकलानां सर्वासां अन्यासां विद्याधरभिन्नानां जातीनां जयिनी अधःकारिणी सर्वजातिभ्यः उत्कर्षवती भवतीति शेषः। यदि सिद्धान्वयजा सिद्धवंशोद्भवा "अन्ववायोऽन्वयो वंशः" इत्यमरः, स्यात् ततः सिद्धाः सिद्धजातीया जनाः त्रिभुवने भुवनत्रयेष्वित्यर्थः प्रसिद्धाः विख्याताः जाताः इति

विदू। (नायकमवलोक्य सहर्षमात्मगतं) दिट्ठिआ चिरस्स दाव कालस्स पड़िदो क्खु एसो गोअरे मम्महस्स। (आत्मानं निर्दिश्य भोजनमभिनीय) अहवा णहि णहि। मम एव्व एकस्स बम्हणस्स। (१)

चेटी। (सप्रणयं) भट्टिदारिए णं भणामि। किं एदाए णिक्करुणाए पुरदो वाइदेण। (इति वीणामाक्षिपति)। (२)

नायिका। (सरोषम्) हञ्जे मा भअवदिं गोरिं अधिक्खिव। णं अज्ज किदो मे भअवदीए पसादो॥ (३)

चेटी। (सहर्षम्) भट्टिदारिए कहेहि दाव कीदिसो। (४)

---

(१) दिष्ट्या चिरस्य तावत् कालस्य पतितः खल्वेष गोचरे मन्मथस्य। अथवा नहि नहि। ममैव एकस्य ब्राह्मणस्य। *

(२) भर्तृदारिके ननु भणामि किमेतस्या निष्करुणायाः पुरतो वादितेन।

(३) हञ्जे मा गौरीं अधिक्षिप। नन्वद्य कृतो मे भगवत्या प्रसादः। †

(४) भर्तृदारिके कथय तावत् कीदृशः। ‡

शेषः ईदृशादद्भुतरूपसम्पन्नकन्याप्रभवत्वादिति भावः। अत्रापि वृत्तं शार्दूलविक्रीड़ितम्। (१)

* आत्मगतं स्वगतं तदुक्तं "सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मत"मिति। दिष्ट्या इति हर्षसूचकं तृतीयान्तमव्ययं।

† अधिक्षिप अवमन्यस्व त्वमिति शेषः।

‡ कीदृशः प्रसादः कृत इति शेषः।

नायिका। हञ्जे जानामि। अज्ज सिविणए एदं एव्व वीणं वादअन्ती भअवदीए गोरीए भणिदह्मि। वच्छे मलअवदि परितुट्ठह्मि तुह एदिणा वीणाविण्णाणादिसयेण इमाए अ बालजणदुक्कराए असाहारणाए ममोवरि भत्तीए। ता विज्जाहरचक्कवट्टी अचिरेण ज्जेव पाणिग्गहं दे णिव्वत्तइस्सदित्ति॥ (१)

चेटी। (सहर्षम्) भट्टिदारिए जदि एव्वं ता कीस सिविणअं इमं भणीअदि। णं हिअअट्ठिदो वरो देवीए दिण्णो॥ (२)

---

(१) हञ्जे जानामि। अद्य स्वप्ने एतामेव वीणां वादयन्ती भगवत्या गौर्या भणितास्मि। वत्से मलयवति! परितुष्टास्मि तवानेनैव वीणाविज्ञानातिशयेन। अनया च बालजनदुष्करया असाधारणया ममोपरि भक्त्या। तत् विद्याधरचक्रवर्त्ती अचिरेणैव ते पाणिग्रहणं निर्वर्त्तयिष्यतीति। *

(२) भर्त्तृदारिके यद्येवं तत्, किं स्वप्न एष भण्यते। ननु हृदयस्थितो वरो देव्या दत्तः।

---

* स्वप्नवृत्तान्तं कथयति हञ्जे इति। स्वप्ने सुप्तिविज्ञाने एतामेव न तु अन्यामित्यर्थः वीणां वादयन्ती अहमिति शेषः भणिता कथिता अस्मि। तव वीणाविज्ञानातिशयेन वीणावादननैपुण्येन परितुष्टा अस्मि अहमिति शेषः। निर्वर्त्तयिष्यति करिष्यति। यदि एवं पूर्वोक्तरूपं भूतमिति शेषः। तत् किं कथं एषः स्वप्न इति भण्यते कथ्यते त्वयेति शेषः नायं स्वप्नः तस्य प्रायेणैवालीकत्वादित्याशयः। देव्या गौर्या हृदयस्थितः अभिलषितः वरः नियतशुभशंसिनी वाक् "देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक्प्रिये" इत्यमरः, दत्तः।

विदू। (श्रुत्वा) भो वअस्स अवसरो क्खु एसो अह्माणं देवीदंसणस्स। ता एहि उवसप्पम्ह ॥ (१)

नायकः। न तावत् प्रविशामि ॥

विदू। (अनिच्छन्तमपि नायकमुद्दिश्य बलादाकृष्य उपसृत्य) सोत्थि भोदीए। भोदि सच्चकं ज्जेव चदुरिआ भणादि। वरो एव्व सो देवीए दिण्णो ॥ (२)

नायिका। (ससाध्वसमुत्तिष्ठन्ती नायकमुद्दिश्य) हञ्जे को णु क्खु एसो॥ (३)

---

(१) भो वयस्य, अवसरः खल्वेषोऽस्माकं देवीदर्शनाय। तदेहि उपसर्पावः। *

(२) स्वस्ति भवत्यै। भवति सत्यमेव चतुरिका भणति। वर एव स देव्या दत्तः। †

(३) हञ्जे को नु खल्वेषः।

---

* देवीदर्शनाय देवीं द्रष्टुं ("तुमर्थाच्च भाववचना" दिति चतुर्थी)

† भवत्यै इति नायिकामुद्दिश्य कथनं "वदेद्धञ्जे प्रेष्यां चेटीं भवतीति विदूषक" इति साहित्यदर्पणम्। चतुरिका बुद्धिमती सत्यमेव भणति कथयति। कथमिति वर एव स दत्तः, वरशब्दोऽत्र श्लिष्टः अयं राजपुत्रः ते तव पाणिग्राहकः अन्यत्र देव्या दत्तः नियतेष्टफलकोऽयं इति "वरो जामातरि वृतौ देवतादेरभीप्सिते" इति मेदिनी।

चेटी (नायकं निरूप्यापवार्य्य) इमाए अणासरिसाए आकिदीए एसो सो भअवदीए पसादीकदोत्ति तक्केमि ॥ (१)

नायिका (सस्पृहं सलज्जञ्च नायकमवलोकयति) ॥

नायकः ।

तनुरियं तरलायतलोचने !
श्वसितकम्पितपीनघनस्तनि ।
श्रममलं तपसैव गता पुनः
किमिति सम्भ्रमकारिणि खिद्यते ॥ २ ॥

---

(१) अनया अनन्यसदृश्या आकृत्या एष स भगवत्या प्रसादीकृत इति तर्कयामि । *

---

* अपवार्य्य अन्यस्य श्रवणगोचरं न स्यात् यथा तथेत्यर्थः तल्लक्षणं यथा "रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारित"मिति ।

तनुरिति । हे तरलायतलोचने ! तरले चञ्चले आयते विशाले लोचने यस्याः सा तत्सम्बुद्धौ श्वसितकम्पितपीनघनस्तनि श्वसितेन निश्वासेन (नपुंसके भावे क्तः) कम्पितौ पीनौ उन्नतौ घनौ सान्द्रौ स्तनौ यस्याः सा तत्सम्बुद्धौ ("स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधा"दिति ङीष्) सम्भ्रमकारिणि ! मदागमनेनेति भावः, तपसा तपश्चरणनिमित्तेन क्लेशेनेत्यर्थः अलमत्यर्थं "अलं भूषणपर्य्याप्तिशक्तिवारणवाचक"मित्यमरः, श्रमं गता प्राप्ता (सर्वे गत्यर्थाः प्राप्त्यर्था ज्ञानार्थाश्चेति न्यायात् गमधातोः प्राप्त्यर्थकत्वमिति) इयं तवेति शेषः तनुः देहः "कायो देहः क्लीवपुंसोः स्त्रियां मूर्त्तिस्तनुस्तनू"रित्यमरः, पुनः किमिति कथं खिद्यते क्लिश्यते मत्सम्भावनाय चञ्चलादिकं कुर्वत्या त्वयेति शेषः । अत्र वृत्तं द्रुतविलम्बितं तल्लक्षणं तथा "द्रुतविलम्बितमाह नभौ भरा"विति । (२)

नायिका । (अपवार्य) हञ्जे अदिसद्धसेण ण सक्कुणोमि एदस्स अहिमुही ठादुं । (नायकं तिर्यक् सव्याजं पश्यन्ती किञ्चित् पराङ्मुखी तिष्ठति) ॥ (१)

चेटी । भट्टिदारिए किं एदं ॥ (२)

नायिका । हञ्जे न सक्कुणोमि एदस्स आसण्णे चिट्ठिदुं । ता एहि अण्णदो गच्छह्म । (उत्थातुमिच्छति) ॥ (३)

विदू । भो भाअदि क्खु एसा । मम पठिअविज्जं विअ सुहत्थअं धारेमि ॥ (४)

नायकः । को दोषः ।

विदू । भोदि किं एत्थ तुह्माणं तवोवणे ईदिस

---

(१) हञ्जे अतिसाध्वसेन न शक्नोमि एतस्याभिमुखी स्थातुम् ।

(२) भर्तृदारिके किमेतत् ।

(३) हञ्जे न शक्नोमि एतस्यासन्ने स्थातुम् । तदेह्यन्यतो गच्छावः ।

(४) भो बिभेति खल्वेषा । मम पठितविद्यामिव सहस्तं धारयामि । *

---

* पठितविद्यामिव पठितविद्या या यथा मन्त्रीभूतत्वमस्ति स्मरणमात्रेणैव आयाति तद्वत् एतस्या अपि अनायासेनैव अस्मत्सकाशादन्यत्र यातुं नावसरं ददामि मद्वचनमात्रं चेति भावः । अथवा यथाहं पठितविद्यां ग्रन्थं (अभ्यस्तकाले) धारयामि पाठान्तरमेव विस्मरामि तद्वदेनामपि ध्रुवं धारयामीति सोपहासोक्तिरियमित्यनुसन्धेयम् ।

आआरो। जेण अदिही आअदो वाआमेत्तकेण वि ण सम्भावीअदि॥ (१)

चेटी। (नायिकां दृष्ट्वा आत्मगतं) अणुरज्जदि विअ एत्थ एदाए दिट्ठी। भोदु एवं दाव भणिस्सं। (प्रकाशं) भट्टिदारिए जुत्तं भणादि वअस्सो। उइदो क्खु दे अदिहिजनसक्कारो। ता किं ईदिसे महाणुभावे पड़िवत्तिमूढ़ा चिट्ठसि। अहवा चिट्ठ तुमं। अहं एव्व जधाणुरूवं करइस्सं। (नायकं निर्दिश्य) साअदं अज्जस्स। आसणपरिग्गहेण अलंकरेदु अज्जो इमं पदेसं॥ (२)

---

(१) भवति किमत्र युष्माकं तपोवने ईदृश आचारः। येनातिथिरागतो वाङ्मात्रेणापि न सम्भाव्यते। *

(२)अनुरज्यत इवास्त्रैतस्या दृष्टिः। भवत्वेवं तावत् भणिष्यामि। भर्तृदारिके युक्तं भणति ब्राह्मणः। उचितः खलु ते अतिथिजनसत्कारः। तत् किमीदृशे महानुभावे प्रतिपत्तिमूढ़ा तिष्ठसि। अथवा तिष्ठ त्वं। अहमेव यथानुरूपं करिष्यामि। स्वागतमार्य्यस्य। आसनपरिग्रहेण अलङ्करोत्वार्य्य इमं प्रदेशम्। †

---

* वाङ्मात्रेणापि तिष्ठतु तावदन्यत् पाद्यार्घ्यादिकं केवलेन वाक्येनापीत्यपेरर्थः तदुक्तं मनुना "तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन" इति।

† एतस्या मलयवत्याः दृष्टिर्दर्शनं अत्र अस्मिन् राजकुमारे अनुरज्यते इव अनुरक्ता इव भवति इयमेतं साभिलाषं पश्यतीति भावः। प्रकाशं आर्थं यथा स्यात्तथा "सर्वश्राव्यं प्रकाशं स्या"दिति दर्प-

विदू। भो वअस्स सोहणं एसा भणादि। उववविसिअ एत्थ मुहुत्तअं वीसमह्म ॥ (१)

नायकः। युक्तमाह भवान्। (उभावुपविशतः) ॥

नायिका। (चेटिकामुद्दिश्य) अयि परिहाससीले मा एव्वं करेहि। कदावि कोवि तावसो पेक्खदि। तदो मं अविणीदेत्ति सम्भावइस्सदि॥ (२)

ततः प्रविशति तापसः।

तापसः। आज्ञापितोऽस्मि कुलपतिना कौशिकेन, यथा वत्स शाण्डिल्य पितुराज्ञया सिद्धयुवराजमित्रावसुर्भविष्य-

---

(१) भो वयस्य शोभनमेषा भणति उपविश्यात्र मुहूर्त्तं विश्राम्यावः।

(२) अयि परिहासशीले मैवं कुरु। कदापि कोऽपि तापसः प्रेक्षते। ततो मामविनीतेति सम्भावयिष्यति। *

व्यतु। तत् तस्मात् किं कथं ईदृशे महानुभावे महान् अनुभावः आशयो यस्य तस्मिन् राजपुत्रे विषये प्रतिपत्तिमूढ़ा प्रतिपत्तौ प्रवृत्तौ सत्कारादानुष्ठाने इति यावत् "प्रतिपत्तिः प्रवृत्तौ चे"ति मेदिनी, मूढ़ा अज्ञाना अकृतसत्कारेत्यर्थः तिष्ठसि नेदं ते उचितमिति भावः।

* तदा मां अविनीता कुत्सितस्वभावेति पुरुषसन्निधिस्थितत्वादिति भावः ("अव्ययोगे चे"ति इति शब्दयोगेन अविनीतेत्यत्र प्रथमा)।

कुलपतिना विप्रर्षिविशेषेण "मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः", कौशिकेन कुशिकगोत्रापत्येन कर्त्रा आज्ञापितः आदिष्टः अस्मि अहमिति शेषः। शाण्डिल्येति तापसस्य

द्विद्याधरचक्रवर्त्तिनं कुमारजीमूतवाहनं इहैव मलयपर्वते क्वापि वर्त्तमानं भगिन्या मलयवत्या वरहेतोर्द्रष्टुमद्य गतः। तच्च प्रतीक्षमाणायां मलयवत्याः कदाचिन्माध्यन्दिनसवनवेलावधिरतिक्रामेत्। तदेनामाहूयागच्छेति। तत् तपोवनगौरीगृहमेव गच्छामि॥ (परिक्रम्य भूमिं निरूप्य सविस्मयं) अये कस्य पुनरियं पांशुले भूप्रदेशे प्रकाशचक्रचिह्ना

नाम। सिद्धयुवराजः सिद्धानां देवयोनिविशेषाणां युवराजः (युवा राजा इति कर्मधारये "राजाहःसखिभ्यष्टजि"ति समासान्तष्टच्) मित्रावसुरिति नाम भविष्यद्विद्याधरचक्रवर्त्तिनं भविष्यत्परिज्ञानन्तु आर्षेर्योगबलेनेत्यनुसन्धेयं तदुक्तं विश्वनाथेन "अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः। सामान्यलक्षणाज्ञानलक्षणायोगजस्तथे"ति, कुमारजीमूतवाहनं इहैव मलयपर्वते क्वापि कस्मिन्नपि प्रदेशे इत्यर्थः। वर्त्तमानं तिष्ठन्तं भगिन्याः मलयवत्याः वरहेतोः पाणिग्रहीतृत्वेन द्रष्टुं अद्य पितुराज्ञया गतः। तं मित्रावसुञ्च प्रतीक्षमाणायाः तदर्थं स्नानादिकमननुतिष्ठन्त्या मलयवत्याः कदाचित् माध्यन्दिनसवनवेलावधिः मध्याह्नस्नानकालः अतिक्रामेत् अतीतो भवेत् (अत्र सम्भावनायां लिङ्) अये इति विस्मये। पांशुले धूलिपूर्णे (पांशुशब्दादस्त्यर्थे लच्) "पांशुर्ना न द्वयो रजः" इत्यमरः, भूप्रदेशे भूमिखण्डे कस्य जनस्य इयं दृश्यमाना प्रकाशचक्रचिह्ना प्रकाशं स्पष्टं चक्रचिह्नं सामुद्रकप्रसिद्धमहापुरुषत्वसूचकलक्षणविशेषः यस्यां सा तथोक्ता एतेनास्य राजचक्रवर्त्तित्वं सूचितं यथा सामुद्रके "यस्य पादतले पद्मं चक्रं वाप्यथ तोरणं। अङ्कुशं कुलिशं वापि स राजा भवति ध्रुव"मिति। पदपङ्क्तिः पदानां भूमिपतितचरणचिह्नानां "पदं शब्दे च वाक्ये च व्यवसायप्रदेशयोः। पादतच्चिह्नयो"रिति मेदिनी, पंक्तिः श्रेणी भवतीति

पदपंक्तिः । (अपतो जीमूतवाहनं निर्द्दिश्य) नूनमस्यैवेयं महापुरुषस्य । (१) तथाहि

उष्णीषः स्फुट एष मूर्द्धनि विभात्यूर्णेयमन्तर्भ्रुवो-
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्द्धते ।
चक्राङ्कं च यथा पदद्वयमिदं मन्ये तथा कोऽप्ययं
नो विद्याधरचक्रवर्त्तिपदवीमप्राप्य विश्राम्यति ॥ २ ॥

शेषः । नूनं निश्चितं अस्य महापुरुषस्य महाभागस्य एव इयं पदपंक्तिर्भवतीति शेषः । (१)

अनन्तरमस्य महापुरुषलक्षणानि वर्णयति उष्णीष इत्यादिना । एष उष्णीषः मस्तकस्थचर्मकोषविशेषः "उष्णीषन्तु शिरोवेष्टे किरीटे लक्षणान्तरे" इति मेदिनी, स्फुटः सुस्पष्टः मूर्द्धनि मस्तके विभाति शोभते अन्तर्भ्रुवोः भ्रूयुगलस्य मध्यस्थले इयं इयमनाना ऊर्णा चक्रवर्त्तित्वसूचकभ्रूद्वयमध्यगतस्वर्णालतन्तुसूक्ष्मांशुनिभप्रभस्तायतलोमावर्त्तक-विशेषः "ऊर्णा मेषादिलोम्नि स्यादन्तरावर्त्तके भ्रुवो"रिति मेदिनी, अस्तीति शेषः, तदुक्तं सामुद्रके "विशेषः पुनरेकोऽत्र भ्रुवोर्मध्ये यदीक्ष्यते । ऊर्णाख्यं रोम तेनास्य नैव राज्यमनिर्द्दिशे"दिति, चक्षुः तामरसानुकारि पद्मतुल्यं "वा पुंसि पद्मं नलिनमरविन्दं महोत्पलं । सहस्रपत्रं कमलं शतपत्रं कुशेशयं ॥ पङ्केरुहं तामरसं" इत्यमरः, हरिणा सिंहेन इन्द्रेण वा वक्षःस्थलं स्पर्द्धते तत् तिरस्करोतीत्यर्थः इदं पदद्वयं चरणयुगलं चक्राङ्कं चक्रचिह्नयुक्तं यथा भवतीति शेषः तथा मन्ये सम्भावयामि अहमिति शेषः अयं कोऽपि विद्या...पदवीं विद्याधराणां चक्रवर्त्तिनः अधिराजस्य पदवीं स्थानं नो न "अभावे नह्यनोनापी"त्यमरः अप्राप्य अलब्ध्वा अपि तु प्राप्यैव "सम्भाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधा"विति वामनः, विश्राम्यति शाम्यतीति शेषः अयमेव भविष्यद्विद्याधरचक्रवर्त्ती यो मया अन्विष्यते इति तर्कयामीति भावः । अत्रापि वृत्तं शार्द्दूलविक्रीडितम् । (२)

अथवा कृतं सन्देहेन। व्यक्तमितिनैव जीमूतवाहनेन भवितव्यं। (मलयवतीं निरूप्य) अये इयमपि राजपुत्री। (उभौ विलोक्य) चिरात् खलु युक्तकारी विधिः स्यात्। यदि युगलकमेतदन्योऽन्यानुरूपं घटयेत्। (उपसृत्य नायकं निर्दिश्य) स्वस्ति भवते॥ (१)

नायकः। भगवन् जीमूतवाहनोऽभिवादयते। (उत्थातुमिच्छति)॥ (२)

तापसः। अलमलमभ्युत्थानेन। ननु सर्वस्याभ्यागतो गुरुरिति भवानेवास्माकं पूज्यः। तद्यथासुखं स्थीयतां॥ (३)

अथवा पक्षान्तरे सन्देहेन विद्याधरचक्रवर्त्त्यर्थं न वेत्येवंरूपेण कृतं सन्देहो न कर्त्तव्यः (कृतमिति वारणार्थमव्ययं सन्देहेनेत्यत्र गम्यमान साधनक्रियापेक्षया तृतीया) चिरात् बहुकालात् परं विधिः दैवं "विधिर्विधाने दैवे चे"त्यमरः, खलु निश्चितं युक्तकारी अनुरूपघटक इत्यर्थः स्यात्। यदि एतत् अन्योन्यानुरूपं परस्परसदृशरूपं युगलकं मिथुनं घटयेत् विवाहसूत्रेण योजयेत् (cf. Raghuvansa, "परस्परेण स्पृहणीयशोभं नचेदिदं द्वन्द्वमयोजयिष्यत्। अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोऽभविष्य"दिति) भवते इत्यत्र स्वस्तिशब्दयोगेन "नमः स्वस्ति स्वाहा स्वधालं वषड्योगाच्चे"ति चतुर्थी। (१)

अभिवादयते नमस्करोति। (२)

अभ्युत्थानेन सत्कारार्थमासनादुत्थानेन अलमलं प्रयोजनं नास्तीत्यर्थः (अलमलमित्यत्र "विवादे विस्मय" इत्यादिना द्विरुक्तिः) ननु भोः सर्वस्य जनस्य अभ्यागतः गृहे उपस्थितः जनः गुरुः पूज्यः यथा "गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणोगुरुः। पतिरेको गुरुः स्त्रीणां सर्वत्राभ्यागतो गुरु"रिति शातातपः। भूयाः (आशिषि लिङ् चेति लिङ्)। (३)

नायिका। अज्ज पणमामि। (१)

तापसः। (नायिकां निर्दिश्य) वत्से! अनुरूपभर्तृगामिनी भूयाः। राजपुत्रि त्वामाह कुलपतिः कौशिकः। यथा अतिक्रामति मध्यन्दिनसवनवेला। तत् त्वरितमागम्यतामिति॥

मलयवती। जं गुरू आणवेदि। (आत्मगतम्) एकत्तो गुरुवअणं अण्णत्तो दइअदंसणसुहं त्ति गमणागमणाधिरूढं अज्जवि मं दोलएदि हिअअं॥ (२)

(उत्थाय निश्वस्य सलज्जं सानुरागञ्च नायकं पश्यन्ती तापससहिता निष्क्रान्ता)।

नायकः। (सोत्कण्ठं निश्वस्य नायिकां पश्यन्)

---

(१) आर्य्यं प्रणमामि।

(२) यद् गुरुराज्ञापयति। एकतो गुरुवचनमन्यतो दयितदर्शनसुखमिति गमनागमनाधिरूढमद्यापि मां दोलयति हृदयम्॥ *

---

* दयितदर्शनसुखं दयितस्य प्रियस्य जीमूतवाहनस्येति शेषः दर्शनेन यत् सुखं। इति हेतोः "इति हेतुप्रकरणप्रकर्षादिसमाप्ति" इत्यमरः, गमनागमनाधिरूढं विकल्पात्मकं हृदयं मां दोलयति चतुर्थिपति एकस्मात् इतरस्मिन् पक्षे इत्यर्थः (दुल कोतृक्षेपे इत्यस्मात् लट्)।

सोत्कण्ठं उत्कण्ठया अभिलषितवस्तुनाप्राप्तीत्सुक्येन सह, तदुक्तं "सर्वेन्द्रियसुखास्वादो यत्राभीत्यनुमन्यते। तत्प्राप्तीच्छां ससङ्कल्पामुत्कण्ठां कवयोविदु"रिति। अनयेति। जघन···यातया जघनस्य श्रोणिपुरोभागस्य "जघनञ्च स्त्रियाः श्रोणिपुरोभागे कटावपी"ति मेदिनी, आभोगः परिपूर्णता "आभोगो वरुणच्छत्रपूर्णतायत्नयोरपी"ति मेदिनी,

अनया जघनाभोगभरमन्थरयातया ।
अन्यतोऽपि व्रजन्त्या मे हृदये निहितं पदम् ॥ १ ॥

विदू । भो दिट्ठं तुए पेक्खिदव्वं । ता दाणिं मज्झण्ण-सूरकिरणसन्तावदिउणिदो विअ मे उदरग्गी धगधगा-अदि । ता एहि णिक्कमह्म । जेण वण्णाणो अदिही भविअ मुणिजणसआसादो लद्धेहिं कन्दमूलफलेहिं पि दाव पाण-धारणं करेमि ॥ (२)

---

(२) भो दृष्टं त्वया प्रेक्षितव्यं । तदिदानीं मध्याह्नसूरकिरणसन्ताप-द्विगुणित इव मे उदराग्निर्धमधमायते । तदेहि निष्क्रामावः येन ग्राम्ना-णोऽतिथिर्भूत्वा मुनिजनसकाशात् लब्धैः कन्दमूलफलैरपि तावत् प्राण-धारणं करोमि ॥ *

तस्य भरः "भरोऽतिशयभारयो" रित्यमरः, तेन मन्थरं विलम्बितं यथा स्यात्तथा यातया अनया गजगमन्येत्यर्थः कन्या अन्यतः अन्यस्मिन्नपि स्थाने व्रजन्त्या गच्छन्त्या मे मम हृदये पदं निहितं दत्तं, अन्यत्र गमने-ऽपि मन्मन आकृष्टमित्यर्थः । अत्र एकत्र गमनेन अन्यत्र पादक्षेपोक्त्या असङ्गतिरलङ्कारः तदुक्तं दर्पणकृता "कार्यकारणयोर्भिन्नदेशतायां असङ्गति"रिति । अत्रापि अनुष्टुप्छन्दः । (१)

* मध्याह्न...द्विगुणितः मध्याह्ने यः सूरः सूर्यः "सूरसूर्यार्यमा" इत्यमरः, तस्य किरणानां सन्तापेन द्विगुणितः कृतद्विगुण इव (द्विगुणशब्दात् "तत् करोति" इत्यादिना णिच् ततः कर्मणि क्तः) उदराग्निः धमधमायते धमधम इति अव्यक्तशब्दं करोति ("लोहितादिडाज्भ्यः क्यष्" इति क्यष् "वा क्यषः" इति आत्मनेपदम्) ।

नायकः। (अर्द्धमवलोक्य) मध्यमध्यास्ते नभस्तलस्य भगवान् सहस्रदीधितिः। (१) तथाहि

तापात् तत्क्षणघृष्टचन्दनरसौ पाण्डू कपोलौ वहन्
संसक्तैर्निजकर्णतालपवनैः संवीज्यमानाननः।
सम्प्रत्येष विशेषसिक्तहृदयो हस्तोज्झितैः शीकरैः
म्लायच्छल्लकदुःसहामिव दशां धत्ते गजानां पतिः॥ (२)

सहस्रदीधितिः सहस्रं दीधितयः किरणा यस्य सः "किरणोस्र-मयूखांशुगभस्तिघृणिधिष्णयः" इत्यमरः, सूर्य्य इत्यर्थः "भानु-र्हंसः सहस्रांशु"रित्यमरः। (मध्यमित्यत्र "अधिशीङ्स्थासां कर्म"ति द्वितीया)। (१)

तापादिति। तापात् हेतोः तत्...रसौ तत्क्षणे घृष्टस्य चन्दनस्य चन्दनवृक्षस्य रसः निर्यासः ययोः तौ अतएव पाण्डू कपोलौ गण्डौ वहन् धारयन् संसक्तैः नियतैः निजकर्णतालपवनैः निजयोः स्वकीययोः कर्णयोः तालपवनैः तालवृन्तोद्भूतवत् वायुभिः संवीज्यमानाननः संवीज्यमानं आननं यस्य स तथोक्तः हस्तोज्झितैः स्वकरनिःसारितैः "हस्तो नक्षत्रभेदे स्यात् करेभकरयोरपी"ति विश्वः। शीकरैः अम्बुकणैः विशेषसिक्तहृदयः विशेषेण अतिशयेन सिक्तं आर्द्रीकृतं हृदयं वक्षःस्थलं यस्य स तथोक्तः "हृदयं मन उरसो"रित्यमरः, एष समीपवर्त्ती गजानां पतिः गजेन्द्रः सम्प्रति अधुना म्लायच्छल्लकदुःसहां म्लायतः म्लानिं प्राप्नुवतः शल्लकस्य भेकस्येव दुःसहां दशां अवस्थां "दशावस्था-वस्थाया"मित्यमरः, धत्ते धारयति। अत्र स्वभावोक्तिरलङ्कारः, तदुक्तं "स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णन"मिति काव्यप्रकाशे। अत्रापि वृत्तं शार्दूलविक्रीडितम्। इति अङ्कसमाप्तौ। सर्वे नटाः निष्क्रान्ताः रङ्गभूमेरित्यर्थः। प्रथमः अङ्कः नाटकैकदेशः, तल्लक्षणं

इति निष्क्रान्ताः सर्वे ॥

प्रथमोऽङ्कः। (३)

यथा "प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः। नानाविधानसंयुक्तो बीजसंहृतिमान्न च। युक्तो न बहुभिः कार्य्यैः नातिप्रचुरपद्यवान्। आवश्यकानां कार्य्याणामविरोधाद्विनिर्मितः। नानेकदिननिर्वर्त्त्यकथया संप्रयोजितः। आसन्ननायकः पात्रैर्युक्तस्त्रिचतुरैस्तथा। बधयुद्धविवाहा-द्यैर्वर्जितो नातिविस्तरः। देवीपरिजनादीनां प्रत्यक्षरचितैर्युतः। अन्तनि-ष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तित" इति विश्वनाथः। (२) (३)।

द्वितीयोऽङ्कः।

(ततः प्रविशति चेटी।)

चेटी। आणत्तह्मि भट्टिदारिआए मलयवदीए। जह्म हञ्जे मणोहरिए अज्ज चिराअदि मे भाअरो अज्जमित्तावसू। ता गदुअ जाणेहि किं आअदो ण वेत्ति। (परिक्रामति नेपथ्याभिमुखं दृष्ट्वा) का उण एसा तुरिततुरिदं इदो एव्व आअच्छदि। (निरूप्य) कहं चदुरिआ॥ (१)

(१) आज्ञप्तास्मि भर्त्तृदारिकया मलयवत्या। यथा हञ्जे मनोहरिके अद्य चिरयति मे भ्राता आर्य्यमित्रावसुः। तद्गत्वा जानीहि

(ततः प्रविशति द्वितीया चेटी)।

प्रथमा। (उपसृत्य) हला चदुरिए किंणिमित्तं उण मं परिहरिअ एव्वं तुरिदाए गच्छीअदि॥ (१)

द्वितीया। हला मणोहरिए आणत्तम्हि भट्टिदारिआए मलअवदीए। हञ्जे चदुरिए! कुसुमावचअपरिस्समणीसहं मे सरीरं। सरदाअवजणिदो विअ मे सन्दावो अधिअदरं बाधेदि। ता गच्छ तुमं बालकदलीपत्तपरिक्खित्तं चन्दनलदाघरए चन्दमणिसिलाअलं सज्जीकरेहित्ति। अणुचिट्ठिअं अ मए जधा आणत्तं। जाव गदुअ भट्टिदारिआए णिवेदेमि॥ (२)

किमागतो नवेति। का पुनरेषा त्वरितत्वरितमित एवागच्छति। कथं चतुरिका। *

(१) हला चतुरिके! किंनिमित्तं पुनर्मां परिहृत्य एवं त्वरितया गम्यते। †

(२) हला मनोहरिके आज्ञप्तास्मि भर्तृदारिकया मलयवत्या। हञ्जे चतुरिके! कुसुमावचयपरिश्रमनिःसहं मे शरीरं। शरदातपजनित इव मे सन्तापोऽधिकतरं बाधते। तद्गच्छ त्वं बालकदलीपत्रपरिक्षिप्ते चन्द्रलतागृहे चन्द्रमणिशिलातलं सज्जीकुर्व्विति। अनुष्ठितञ्च मया यथाज्ञप्तं। यावद्गत्वा भर्तृदारिकायै निवेदयामि। ‡

---

* चिरयति विलम्बं करोति। त्वरितत्वरितं शीघ्रप्रकारं ("प्रकारे गुणवचनस्य" इति द्विरुक्तिः)।

† हला इति सखीसम्बोधनं "हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति" इत्यमरः, परिहृत्य त्यक्त्वा त्वरितया द्रुततया त्वयेति शेषः। गम्यते इति (भावे लट्)।

‡ मे मम शरीरं कुसुमावचयपरिश्रमनिःसहं कुसुमानां अव-

प्रथमा । जइ एव्वं ता लहुं गदुअ निवेदेहि । जेण से तहिं गदाए उवसमदि सन्दावो ॥ (१)

द्वितीया । (विहस्यात्मगतम्) ण ईदिसो से सन्दावो । जो एव्वं उवसमिस्सदि । विचित्तरमणीअं चन्दणलदाघरअं पेक्खन्तीये अधिअदरो सन्दावो हुविस्सदित्ति तक्केमि । (प्रकाशं) ता गच्छ तुमं । अहम्पि सज्जीकदं मणिसिलाअलंत्ति गदुअ भट्टिदारिआए निवेदेमि । (इति निष्क्रान्ते) ॥ (२)

---

(१) यद्येवं तल्लघु गत्वा निवेदय, येनास्यास्तत्र * गताया उपशाम्यति सन्तापः ।

(२) नेदृगस्याः सन्तापः य एवमुपशमिष्यति । विचित्ररमणीयं चन्दनलतागृहं प्रेक्षमाणाया अधिकतरः सन्तापो भविष्यतीति तर्कयामि तद्गच्छ त्वं । अहमपि सज्जीकृतं मणिशिलातलमिति गत्वा भर्तृदारिकायै निवेदयामि । †

यत्नेन चयनेन यः परिश्रमः तेन निःसहं क्लान्तं । शरदातपजनित इव शरदि आतपस्य प्रखरत्वात् इत्यर्थः । बाधते क्लिश्नाति । बालकदलीपत्रपरिक्षिप्ते बालैः नवैः एतेन मृदुत्वं सूचितं कदलीपत्रैः परिक्षिप्ते वेष्टिते चन्दनलतागृहे चन्दनलतानिर्मिते कुञ्जे इत्यर्थः एतेन सौगन्ध्यं सूचितं । चन्द्रमणिशिलातलं चन्द्रकान्तमणिशिलापट्टं सज्जीकुरु कुसुमास्तरणादिना शयनयोग्यं कुरु । यथा आज्ञप्तं तथा मया अनुष्ठितं सज्जीकृतमित्यर्थः ।

* तत्र चन्दनलतागृहे । † तस्या मलयवत्याः सन्ताप ईदृशः वाताग्रैत्यादिना अपनोद्यः न भवतीति भावः । यः सन्तापः एवं चन्दनलतागृहगमनेनेत्यर्थः । विचित्ररमणीयं अतिमनोहरमित्यर्थः । चन्दनलतागृहं प्रेक्षमाणायाः

प्रवेशकः। (१)

ततः प्रविशति औत्सुक्यवती मलयवती चेटी च॥

मलयवती। (निश्वस्यात्मगतम्)। हिअअ तधा णाम तस्सिं जणे जं लज्जाए मन्थरं सुहं कदुअ दाणिं तहिं अत्तणा गदोसित्ति अहो दे अप्पम्भरित्तणं। (प्रकाशं) हञ्जे चदुरिए आदेसेहि मे भअवदीए आयदणं॥ (२)

---

(२) हृदय तथा नाम तस्मिन् जने यत् लज्जया मन्थरं सुखं कृत्वेदानीं तत्रात्मना गतमसीति अहो ते आत्मम्भरित्वं। हञ्जे चतुरिके आदेशय मह्यं भगवत्या आयतनम्। *

पश्चान्त्या मलयवत्या इति शेषः अधिकतरः सन्तापः भविष्यति इति तर्कयामि मन्ये अहमिति शेषः। (cf. "अन्तर्गता मदनवह्निशिखावली या सा बाध्यते किमिह चन्दनपङ्कलेपैः। यत् कुम्भकारपवनोपरिपङ्कलेपस्तापाय केवलमसौ न च तापशान्त्यै" इति कालिदासः)।

प्रवेशकः इत्तवर्त्तिष्यमाणकथांशज्ञापकनीचपात्रप्रयोजितनाटकभागविशेषः तल्लक्षणं "प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा" विष्कम्भकस्तु "वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कम्भः मध्यपात्रप्रयोजितः" इति धनञ्जयः। (१)

* हृदय इति स्वमनसः सम्बोधनं। तथा प्रथमदर्शनसमये इति शेषः। तस्मिन् जने जीमूतवाहने इत्यर्थः। लज्जया हेतुना सुखं मन्थरं कृत्वा किञ्चिदप्यसञ्जात्यर्थः इदानीं अधुना आत्मना स्वयं मां परित्यज्येति भावः तत्र जीमूतवाहनसकाशं गतमसि त्वमिति शेषः। (अत्र सम्बुद्धस्य क्लीवलिङ्गत्वात् युष्मच्छब्दस्यापि क्लीवत्व मत एव गतमित्यपि क्लीवलिङ्गं) अधुना चित्तस्य

चेटी। (आत्मगतम्)। चन्दणलदाघरं पत्थिदा भणादि भअवदीए आअदणं। (प्रकाशम्) चन्दणलदाघरअं भट्टिदारिआ पत्थिदा॥ (१)

नायिका। (सलज्जं) हञ्जे सुट्ठु सुमराविदं। ता एहि तहिं एव्व गच्छह्म॥ (२)

चेटी। एदु एदु भट्टिदारिआ॥ (३)

---

(१) चन्दनलतागृहं प्रस्थिता भणति भगवत्या आयतनम्। चन्दनलतागृहं भर्त्तृदारिका प्रस्थिता।

(२) हञ्जे सुष्ठु स्मारितं। तदेहि तत्रैव गच्छावः।

(३) एतु एतु भर्त्तृदारिका।

जीमूतवाहनासक्तत्वादियमुक्तिः। अहो आश्चर्य्यं ते तव आत्मम्भरित्वं स्वकार्य्यमात्रनिर्वाहकत्वं। अत्र चित्तासङ्गाख्यपूर्वरागभेद उक्तः "दृङ्मनःसङ्गसङ्कल्पजागराः कृशतारतिः। ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इति कालिदासः। आदेशय भणति भगवत्या आयतनं गौरीमन्दिरं। अत्र चन्दनलतागृहमुद्दिश्य गताया मलयवत्या गौरीगृहप्राप्तिकथनं भ्रमात् कृतमत एव प्रलापाख्यस्मरदशाविशेषः यथा "अलक्ष्यवाक् प्रलापः स्याच्चेतसो भ्रमणाद्भृश"मिति दर्पणकृत्। अतःपरं स्मरत्वादिकं वर्णितं तन्निष्कर्षो यथा "उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते। विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः। यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यात्॥ श्रवणाद्दर्शनाद्वापि मिथःसंरूढरागयोः। दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते॥ अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंप्रलापश्च। उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशा" इति दर्पणकृत्। सलज्जं आत्मोन्मनस्कत्वप्रकाशादित्यर्थः।

नायिका। अन्यतो गच्छति। *

चेटी। (पृष्ठतो दृष्ट्वा सोद्वेगमात्मगतम्)। अह्वो से सुण्णहिअ-अत्तणं। कहं तं एव्व देवीभवणं पत्थिदा। (प्रकाशम्) भट्टिदारिए णं इदो चन्दणलदाघरअं। ता इदो इदो एहि। (१)

नायिका। सविलक्षस्मितं तथा करोति॥

चेटी। इदं चन्दणलदाघरअं। ता पविसिअ चन्दनमणि-सिलाअले उवविसिअ समस्ससदु भट्टिदारिआ। (उभे उपविशतः) (२)

नायिका (निश्वस्य आत्मगतम्) भअवं कुसुमाउह जेण तुमं रूअसोहाए णिज्जिदोसि। तस्स तुए ण किम्पि कदं। मम उण अणवरद्धाएवि अवलेत्ति करिअ पहरन्तो ण लज्जेसि। (आत्मानं निर्वर्ण्य मदनावस्थां नाटयन्ती प्रकाशं) हञ्जे कीस उण घणपल्लवणिरुद्धसूरकिरणं तं एव्व चन्दनलदाघरअं ण मे अज्जवि सन्दावदुक्खं अवणेदि॥ (३)

---

(१) अहो तस्याः शून्यहृदयत्वं। कथं तदेव देवीभवनं प्रस्थिता। भर्तृदारिके नन्वितश्चन्दनलतागृहम्। तदित एव एहि।

(२) इदं चन्दनलतागृहं। तत् प्रविश्य चन्द्रमणिशिलातले उपविश्य समाश्वसितु भर्तृदारिका। †

(३) भगवन् कुसुमायुध येन त्वं रूपशोभया निर्जितोऽसि तस्य त्वया न किमपि कृतम्। मम पुनरनपराद्धाया अपि अबलेति कृत्वा

---

* अन्यतः स्थानान्तरं गच्छति चित्तोद्भ्रान्तत्वादिति भावः।

† समाश्वसितु आश्वस्ता भवतु क्लेशापनोदं करोत्वित्यर्थः।

चेटी । जाणामि अहं एत्थं सन्दावस्स कारणं । किं उण असम्भाविणी भट्टिदारिआ ण तं पडिवज्जिस्सदित्ति ॥ (१)

प्रहरन् न लज्जसे । कष्टं किं पुनर्घनपल्लवनिरुद्धसूर्य्यकिरणं तदेव चन्दनलतागृहं न मे अद्यापि सन्तापदुःखमपनयति । *

(१) जानाम्यहमत्र सन्तापस्य कारणं । किं पुनरसम्भाविनी भर्तृ-दारिका न तत् प्रतिपत्स्यते इति । †

---

* कुसुमायुध कुसुमं पुष्पं आयुधः यस्य स कामः तत्सम्बुद्धौ । येन जनेन कर्त्रा जीमूतवाहनेनेत्यर्थः त्वं रूपशोभया निर्जितः अधःकृतः असि जीमूतवाहनस्य कामादपि सौन्दर्य्याधिक्यादियमुक्तिः । तस्य जनस्य जेतु-रित्यर्थः किमपि क्लेशादिकमित्यर्थः न कृतं । इयं नायिकायाः सम्भावना न तथ्या नायकोऽपि इयमिव दह्यते मदनेन (cf. Sakuntala, "शकु-न्तला वाचयति । तुज्झ ण आणे हिअअं मम उण कामो दिवावि रत्तिंपि । णिग्घिण तवइ बलीअं तुइ वुत्तमणोरहाइं अङ्गाइं । राजा सहसो-पसृत्य । तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव । ग्लप-यति यथा शशाङ्कं न तथाहि कुमुद्वतीं दिवसः ।") मम पुनः तु अन-पराद्धाया अकृतापराधायाः अपि अबला बलहीना इति कृत्वा इयं दुर्बला अतः अस्याः अपकारे कृतेऽपि किमपि प्रतिकर्त्तुं न शक्ष्यतीति स्थिरी-कृत्येत्यर्थः, प्रहरन् क्लिश्नन् न लज्जसे, दुर्बलस्य प्रतीकाराक्षमस्य प्रहारा-दिकं प्रकर्त्तुं न यशसे भवतीति प्रसिद्धिः । घन...किरणं घनैः निविडैः पल्लवैः निरुद्धाः निवारितप्रवेशाः सूर्य्यस्य किरणाः यत्र तत् तथोक्तं एतेन सन्तापहारित्वमुक्तं । तदेव पूर्ववत् सन्तापहरमेव, अद्यापि चिरा वस्थानेनापि ।

† असम्भाविनी मदुक्तमसम्भवमिति मन्यमाना भर्तृदारिका तत् सन्तापकारणं न प्रतिपत्स्यते स्वीकरिष्यति ।

नायकः । (आत्मगतम्) लक्खिदा विश्र अहं एदाए । तहावि पुच्छिस्सं । (प्रकाशम्) हञ्जे किं तं जं ण पडिवज्जिअदि । ता कहेहि दाव किं तं कारणं ॥ (१)

चेटी । एसो दे हिअअट्ठिदो वरो ॥ (२)

नायिका । (सहर्षं ससम्भ्रमम्त्थाय द्वित्राणि पदानि गत्वा) कहिं कहिं सो ॥ (३)

चेटी । (उत्थाय सस्मितं) भट्टिदारिए सो को ॥ (४)

नायिका । (सलज्जमुपविश्य अधोमुखी तिष्ठति) ॥

चेटी । भट्टिदारिए एदस्सि वत्तुकामा । एसो दे हिअअट्ठिदो वरो एव्व देवोए दिण्णो सिविणके ॥ पच्छवि कुसणं

(१) लक्षितेवाहमेतया । तथापि प्रक्ष्यामि । हञ्जे किं तत् यन्न प्रतिपद्यते । तत् कथय तावत् । किं तत् कारणं । *

(२) एष ते हृदयस्थितो वरः । †

(३) कुत्र कुत्र सः ।

(४) भर्तृदारिके स कः । ‡

* अहं एतया चतुरिकया लक्षिता ज्ञातमदनखेदेव । तथापि अनया परमार्थतः ज्ञातेऽपि प्रक्ष्यामि जिज्ञासां करिष्यामि ।

† एष ते हृदयस्थितः वरः इत्युक्ते मलयवती जीमूतवाहनस्य सान्निध्यं मन्यमाना कथयति कुत्रेत्यादि । सम्भावनेयमेतच्छब्दबलात् कृता तदुक्तं "इदमः प्रत्यक्षरूपं समीपतरवर्त्ति चैतदो रूपं । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीया" दिति ।

‡ सः कः किन्नामा जनः यस्त्वया अन्विष्यतेऽत्यर्थः ।

एव्व परिमुक्ककुसुमवाणो विश्र मश्ररद्धश्रो भट्टिदारिश्राए दिट्ठो। सो दे इमस्स सन्दावस्स कारणं जेण एदं सहावसोश्रलम्मि चन्दणलदाघरश्रं ण दे सन्दावदुक्खं अवणेदि॥ (१)

णायिका। चदुरिश्राए लक्खिदह्मि। सच्चं हञ्जे चदुरिश्रा क्खु तुमं। किं दे अवरं पच्छाईश्रदि। ता कहिस्सं॥ (२)

चेटी। भट्टिदारिश्राए दाणिं एव्व कहिदं किं बहुणा पल्लविदेण। अलं सङ्कणेण। मा सन्तप्प। जइ अहं

---

(१) भर्तृदारिके एतदस्मि वक्तुकामा। एष ते हृदयस्थितो वर एव देव्या दत्तः स्वप्ने। पश्चादपि त्यक्तमेव प्रविमुक्तकुसुमवाण इव मकरध्वजो भर्तृदारिकया दृष्टः। स ते अस्य सन्तापस्य कारणं। येनैतत् स्वभावशीतलमपि चन्दनलतागृहं न ते सन्तापदुःखमपनयति। *

(२) चतुरिकया लक्षितास्मि। सत्यं हञ्जे चतुरिका खलु त्वम्। † किं ते अपरं प्रच्छाद्यते। तत् कथयिष्यामि।

---

* वक्तुकामा वक्तुं कामो यस्याः सा (तुङ्कामसनसोरपीत्यादिना मकारलोपः)। देव्या गौर्य्या ते तव हृदयस्थितः अभिलषितः वरः स्वप्ने दत्तः पश्चात् तदनन्तरमपि प्रविमुक्तकुसुमवाणः प्रविमुक्तः त्यक्तः कुसुमवाणः पुष्पशरो येन स तथोक्तः पुष्पशररहित इत्यर्थः मकरध्वजः काम इव स्थितः सौन्दर्य्याधिक्यादिदमुक्तं क्षणमेव त्वया दृष्टः। † त्वं चतुरिका खलु सत्यं अन्वर्थं तव चतुरिकेति नाम इङ्गितनिपुणकर्मकरणात् अवयवार्थयुक्तं जातमिति भावः।

चदुरिआ तदा सोवि भट्टिदारिअं अवेक्खन्तो ण मुहुत्तअं पि अहिरमिस्सदि । ता एदम्मि मए लक्खिदं ॥ (१)

नायिका । (सास्रम्) हञ्जे कुदो अम्हाणं एत्तिओ भाअधेओ ॥ (२)

चेटी । भट्टिदारिए मा एव्वं भण । किं महुसूअणो विअ वच्छत्थलेण लच्छिं अणुव्वहन्तो णिव्वुदो भोदि ॥ (३)

नायिका । किं सुअणो पिअं वज्जिअ अण्णं भणिदुं जाणेदि । सहि अदोवि मे सन्दावो अधिअदरं वाधेदि । जं सो महा-

---

(१) भर्तृदारिकया इदानीमेव कथितं । किं बहुना प्रलपितेन अलं संक्षुभितेन । मा सन्तप्यस्व । यद्यहं चतुरिका तदा सोऽपि भर्तृदारिकामप्रेक्षमाणो न मुहूर्त्तमप्यभिरंस्यते । तदिदमपि मया लक्षितम् । *

(२) हञ्जे कुतोऽस्माकमेतावद्भागधेयं । †

(३) भर्तृदारिके मैवं भण । किं मधुसूदन इव वक्षःस्थलेन लक्ष्मीमनुवहन् निर्वृतो भवति ।

---

* इदानीमेव कथितं अद्यप्रादिनेत्यर्थः । प्रलपितेन निरर्थवाक्येन "प्रलापोऽनर्थकं वचः" इत्यमरः । यदि अहं चतुरिका इत्यन्वर्थनामा स्यामिति शेषः । अभिरंस्यते सुखी भविष्यति । इदमपि त्वां विना तस्यासुखावस्थानमपि मया लक्षितं ज्ञातम् ।

† भागधेयं भाग्यं "दैवं दिष्टं भागधेयं भाग्य"मित्यमरः (रूपनामभागेभ्यो धेय इति स्वार्थे धेयः) किं इव इति प्रश्ने । मधुसूदनः मधुनामानं दैत्यं सूदयति नाशयतीति "मधुदैत्ये मधुर्दैत्य" इति कोषः । निर्वृतः सुखी ।

णुभावो वाप्रामेत्तकेण ण सम्भाविदो। सोवि अकिदपडिवत्ती अदक्खिणेत्ति मं सम्भावइस्सदि॥ (इति रोदिति) (१)

चेडो। भट्टिदारिए मा रोद। अहवा कहं ण रोइस्सदि। अहिओ से हिअअस्स सन्दावो अधिअदरं बाधेदि। ता किं दाणीं एत्थ करइस्सं। ता जाव चन्दणलदापल्लवरसं से हिअए दाइस्सं।। (उत्थाय चन्दनपल्लवं गृहीत्वा निष्पीड्य हृदये ददाति)। भट्टिदारिए णं भणामि मा रोद। अअं क्खु ईदिसो चन्दणरसो इमेहिं अणवरदपडन्तेहिं वाहविन्दूहिं

---

(१) किं सुजनः प्रियं वर्ज्जयित्वा अन्यत् भणितुं जानाति। सखि! अतोऽपि मे सन्तापोऽधिकतरं बाधते। यत् स महानुभावो वाङ्मात्रेणापि मया न सम्भावितः। सोऽप्यकृतप्रतिपत्तिरदक्षिणेति सम्भावयिष्यति। ※

---

* किं सुजनः प्रियं वर्ज्जयित्वा परिहाय अन्यत् अप्रियं भणितुं वक्तुं जानाति नेति भावः। "सत्यं ब्रूयात् प्रियं ब्रूयादि"त्याद्युक्तेः। मम सान्त्वनायैव त्वमीदृशं वदसीति सम्भावयामीति भावः। अतः अस्मात् वक्ष्यमाणात् हेतोः मे मम सन्तापः अधिकतरं बाधते क्लिश्नाति। कः स हेतुरित्याह यत् स महानुभावः महात्मा जीमूतवाहन इत्यर्थः वाङ्मात्रेण केवलया वाचापि मया न सम्भावितः पूजितः। सोऽपि अकृतप्रतिपत्तिः न कृता प्रतिपत्तिः गौरवं आदर इत्यर्थः यया सा तथोक्ता "प्रतिपत्तिः प्रवृत्तौ च प्रागल्भ्ये गौरवेऽपि चे"ति मेदिनी अदक्षिणा असरला इति "दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्त्तिषु"ति मेदिनी, सम्भावयिष्यति शङ्कते।

उण्हीकदो ण दे हिअअस्स एदं सन्दावं अवणेदि। (कदलीपत्रमादाय वीजयति)। (१)

नायिका। (हस्तेन निवारयति)। सहि मा वीजेहि। उण्हो क्खु एसो कदलीदलमारुदो॥ (२)

चेटी। भट्टिदारिए मा इमस्स दोसं कहेहि। तुमं चिअ चन्दणपल्लवसंसग्गसीदलं इमं णीसासेहिं पपञ्चिअ कदलीदलमारुदं उण्हं कुणासि। (३)

---

(१) भर्तृदारिके मा रुदिहि। अथवा कथं न रोदिष्यति। अधिकोऽस्या हृदयस्य सन्तापोऽधिकतरं बाधते। तत् किमिदानीमत्र करिष्ये। तद्यावत् चन्दनलतापल्लवरसमस्या हृदये दास्यामि। भर्तृदारिके ननु भणामि मा रुदिहि। अयं खल्वीदृगचन्दनरस एभिरनवरतपतद्भिर्बाष्पबिन्दुभिरुष्णीकृतो न ते हृदयस्य एनं सन्तापमपनयति। *

(२) सखि मा वीजय। उष्णः खल्वेष कदलीदलमारुतः †

(३) भर्तृदारिके मा अस्य दोषं कथय। त्वं चित चन्दनपल्लवसंसर्ग-शीतलं इमं निश्वासैः प्रपञ्च्य कदलीदलमारुतं उष्णं करोषि। ‡

---

* चन्दनलतापल्लवरसं स्निग्धकरत्वादित्यर्थः। हृदये वक्षसि। मा रुदिहि कथमित्याशङ्कयाह यतः अयं ईदृशः शीतल इत्यर्थः चन्दनरसः, अनवरतपतद्भिः नियतं क्षरद्भिः एभिः परिदृश्यमानैः बाष्पबिन्दुभिः अश्रुकणैः उष्णीकृतः अनुष्णः उष्णः कृतः इति तथोक्तः सन् ते तव हृदयस्य एतं वर्त्तमानं तापं सन्तापं न अपनयति दूरीकरोति।

† कदलीदलमारुतः कदलीपत्रसञ्चालनोत्पन्नवायुः।

‡ अस्य कदलीपत्रमारुतस्येत्यर्थः। दोषं उष्णत्वरूपं। त्वं चित...

नायिका । (सास्रम्) सहि ! अत्थि कोवि इमस्स दुक्खस्स उवसमोवाओ ॥ (१)

चेटी । भट्टिदारिए अत्थि जदि सो एत्थ आअच्छदि ॥ (२)

ततः प्रविशति नायको विदूषकश्च ।

नायकः ।

व्यावृत्त्यैव सितासितेक्षणरुचा तानाश्रमे शाखिनः

कुर्वन्त्या विटपावसक्तविलसत्कृष्णाजिनौघानिव ।

---

(१) सखि ! अस्ति कोऽपि अस्य सन्तापस्योपशमोपायः ।

(२) भर्तृदारिके अस्ति यदि सोऽत्रागच्छति ।

शीतलं चितैः सङ्गृहीतैः चन्दनपल्लवैः संसर्गेण संयोगेन शीतलं इमं कदलीदलमारुतं निश्वासैः त्वदीयैः उष्णैरिति शेषः प्रपञ्च वैपरीत्यं प्रापय्य दूषयित्वेत्यर्थः उष्णं करोषि ।

व्यावृत्त्येति । व्यावृत्त्य परावृत्त्य पश्चाद्भागेऽवलोक्येत्यर्थः एव सितासितेक्षणरुचा सिता शुक्ला असिता कृष्णा तारकावच्छेदे इति शेषः या ईक्षणयोः चक्षुषो रुक् शोभा तया करणेन "अवदातः सितो गौरः" इति "कृष्णे नीलासितश्यामकालश्यामलमेचकाः" इति "रुचः प्रभारुग्रुचिस्त्विड्भा" इति चामरः, अथवा तयोक्ता रुक् यस्याः स तयोक्तया इति तयेति पदस्य विशेषणमपि, आश्रमे स्थितानिति शेषः तान् शाखिनः वृक्षान् विटप... ओघान् विटपेषु शाखासु अवसक्तः लम्बितः विलसन् शोभमानः कृष्णाजिनानां मृगविशेषचर्म्मणां समूहो येषु तान् तथोक्तानिव कुर्वन्त्या तया मलयवत्येति शेषः कलत्री मुनेः तस्या आश्रानाय मे चितस्य तापस्य अपि पुरः समीपे यद् दृष्टोऽस्मि अद्यमिति शेषः तेन दर्शनेनैव एवं

यद् दृष्टोऽस्मि तया मुनेरपि पुरस्तेनैवमभ्याहते
पुष्पेषो भवता मुधैव किमिति क्षिप्यन्त एते शराः ॥१॥

विदू। भो वअस्स ! कहिं क्खु दे गदं तं धीरत्तणं ॥ (२)

नायकः। वयस्य ननु सुधीर एवास्मि। कुतः

नीताः किं न निशाः शशाङ्कधवला नाघ्रातमिन्दीवरं

---

(२) भो वयस्य ! कुत्र खलु ते गतं तद् धीरत्वम् ।

देहं अतिदारुणमित्यर्थः अभ्याहते क्लिष्टे प्रापितमदनखेदे मयीति शेषः हे पुष्पेषो मदन किमिति कथं मुधा वृथा एव त्वदुद्दिष्टपीड़नस्य पूर्व्वमेव समाहितत्वादित्यर्थः एते शराः क्षिप्यन्ते । किमनेन पिष्टपेषणेन तवेति भावः । अत्रापि वृत्तं शार्दूलविक्रीड़ितम् । (१)

नीता इति । मया कर्त्रा विधुरेषु व्याकुलकारिषु वस्तुष्वित्यर्थः सत्स्विति शेषः किं शशाङ्कधवलाः चन्द्रावदाता निशा रात्रयः निर्व्याजं अस्खलितं यथा तथा "व्याजस्तु स्खलिते" इति कोषः, न नीताः यापिताः अपि तु यापिता एवेत्यर्थः, इन्दीवरं नीलपद्मं "इन्दीवरन्तु नीलेऽस्मि"न्नित्यमरः, निर्व्याजं न आघ्रातं अपि तु आघ्रातमेवेत्यर्थः, किं उन्मीलितमालतीसुरभयः उन्मीलिताभिः विकसिताभिः मालतीभिः पुष्पविशेषैः सुरभयः घ्राणतर्पणाः "सुरभिर्घ्राणतर्पण" इत्यमरः, प्रदोषानिला निशामुखे वहमाना वायवः न सोढ़ाः सेविता निर्व्याजमिति शेषः अपि तु सोढ़ा एवेत्यर्थः, किंवा कमलाकरे तड़ागे "पद्माकरस्तड़ागः स्या"दित्यमरः, मधुलिहां भ्रमराणां झङ्कारः अव्यक्तध्वनिविशेषः न श्रुतः निर्व्याजमिति शेषः अपि तु श्रुत एवेत्यर्थः एतेषां शशाङ्कादीनां उद्दीपकत्वमुक्तं यथा "चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मत"मिति, येन भवान् मां अधीरः धैर्य्यहीनः इति अभिधत्ते कथयति । "मनसो निर्व्विकारत्वं सत्स्वपि कारणेषु धैर्य्य"मिति रसिकाः । उक्तेषु उद्दीपककारणेषु सत्-

किं नोन्मीलितमालतीसुरभयः सोढ़ाः प्रदोषानिलाः।
झङ्कारः कमलाकरे मधुलिहां किंवा मया न श्रुतो
निर्व्याजं विधुरेष्वधीर इति मां येनाभिधत्ते भवान्॥१॥

(विचिन्त्य) अथवा सुषा नाभिहितम्। वयस्यात्रेय।
नन्वधीर एवास्मि।

स्त्रीहृदयेन न सोढ़ाः चिप्राः कुसुमेषवोऽप्यनङ्गेन।
येनाद्यैव पुरस्तव वदामि धीर इति स कथमहम्॥२॥

विद्। (आत्मगतम्) एव्वमधीरत्तणं पड़िवज्जन्तेण आचक्खिदो महान्तो अणेण हिअअस्स आवेगो। ता जाव कहिं एव्व एदं अवक्खिवामि। (प्रकाशम्) भो वअस्स कीस उण अज्ज तुमं लहुं जेव्व गुरुअणं सुस्सूसिअ इध आगदो। (१)

---

(१) एवमधीरत्वं प्रतिपाद्यमानेन आख्यातो महानेनेन हृदयस्यावेगः। तत् यावत् कुत्रैव एनं अपक्षिपामि। भो वयस्य कथं पुनरद्य त्वं लघ्वेव गुरुजनं शुश्रूषित्वा इहागतः। *

अपि मया निर्विकारं स्थितं तथापि मामधीर इति वदसि त्वमहो नेऽदूरदर्शित्वमिति भावः। अत्रापि वृत्तं शार्दूलविक्रीड़ितम्। (१)

स्त्रीति। येन मयेति शेषः स्त्रीहृदयेन स्त्रियां आसक्तमिति शेषः हृदयं मनो यस्य तथोक्तेन सता अनङ्गेन कामेन चिप्राः कुसुमेषवः पुष्पबाणा अतिकोमला इत्यर्थः अपि न सोढ़ाः स ताहृशाधीरप्रकृतिरित्यर्थः अहमद्यैव धीर इति कथं तव पुरः समीपे वदामि न कथमपीत्यर्थः। आर्य्यावृत्तं तच्चक्तमूक्तं प्राक्। (२)

* एवं उक्तप्रकारेण अधीरत्वं प्रतिपाद्यमानेन प्राप्यमानेन मयेति

नायकः। वयस्य स्थाने प्रश्नः। कस्य वान्यस्यैतत् कथनीयम्। अद्य खलु स्वप्ने जानामि। सैव प्रियतमा॥ (अङ्गुल्या निर्दिशन्) अत्र चन्दनलतागृहे चन्द्रकान्तमणिशिलायामुपविष्टा प्रणयकुपिता किमपि मामुपालभमानेव रुदती मया दृष्टा †। तदिच्छामि स्वप्नानुभूतदयितासमागमरम्ये अस्मिंश्चन्दनलतागृहे दिवसशेषं समतिवाहयितुम्। तदेहि गच्छावः (परिक्रामतः)।

चेटी। (कथं दृष्ट्वा सहर्षम्) भट्टिदारिए पद्दसहो विअ। (१)

नायिका। (सवैलक्ष्यमात्मानं पश्यन्ती) हञ्जे मा ईदिसं आआरं पेक्खिअ कोवि मे हिअअं तुलइस्सदि। ता उट्ठेहि

(१) भर्तृदारिके पदशब्द इव।

प्रयोजककर्त्रेति शेषः अनेन (प्रयोक्त्रेन) महान् समधिकः हृदयस्य मनसः आवेगः क्षोभः आख्यातः कथितः। तत् तस्मात् यावत् कुत्रैव कस्मिन् विषये एनं अपक्षिपामि आसक्तं करोमि केनोपायेन एनं क्षोभरहितं करोमीत्यर्थः। † स्थाने युक्तः "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः। (कस्येत्यत्र विवक्षावशात् कारकाणि भवन्तीति न्यायात् षष्ठी) अङ्गुल्या निर्दिशन् चन्दनलतागृहमिति शेषः। स्वप्ने वर्णयति सेति। सैव या मया पूर्वमत्र दृष्टा प्रियतमा प्रिया भवत्यवतीत्यर्थः अत्र अस्मिन् चन्दनलतागृहे चन्दनलतानिर्मिते कुञ्जगृहे चन्द्रकान्तमणिशिलायामुपविष्टा सती प्रणयकुपिता तां प्रति ममानास्थाद्यनुमानेन क्रुद्धा सती किमपि अनिर्दिष्टं मां उपालभमाना तिरस्कुर्वन्ती च रुदती मया दृष्टा।

इमिना रत्तासोअपादवेण अन्तरिदाओ पेक्खह्म दाव को एसोत्ति । (तथा कुरुतः) । (१)

विदू । एदं चन्दणलदाघरअं । ता एहि पविसह्म । (नाट्येन प्रविशतः) ॥ (२)

नायकः ।

चन्दनलतागृहमिदं सचन्द्रमणिशिलमपि प्रियं न मम ।
चन्द्राननया रहितं चन्द्रिकया मुखमिव निशायाः ॥ (३)

---

(१) पश्य मा ईदृशमाकारं प्रेक्ष्य कोऽपि मे हृदयं तुलयिष्यति । तदुत्तिष्ठ । अनेन रक्ताशोकपादपेन अन्तरिते प्रेक्षावहे तावत् क एष इति । *

(२) इदं चन्दनलतागृहं । तदेहि प्रविशावः ।

---

* ईदृशमुपस्थितरूपं आकारं देहं खरदशापन्नमित्यर्थः प्रेक्ष्य दृष्ट्वा कोऽपि जनः मे मम हृदयं मनः तुलयिष्यति तुलां परिमाणं करिष्यति (तुलाशब्दात् तत् करोति तदाचष्ट इति णिच् ततो लृट्) मम हृदयस्य विकारं ज्ञास्यति वेदिति भावः ।

चन्दनेति । इदं चन्दनलतागृहं सचन्द्रमणिशिलं चन्द्रकान्तमणिशिलासहितमपि चन्द्राननया चन्द्रवत् आननं मुखं यस्याः सा तया मलयवत्येत्यर्थः (अत्र आननशब्दस्य बहुस्वरत्वात् न ङीप्) रहितं सत् चन्द्रिकया ज्योत्स्नया "चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः, रहितमिति शेषः, निशाया मुखमिव प्रदोष इव मम प्रियं प्रीतिकरं न भवतीति शेषः, अत्र साधर्म्यकथनादुपमा तत्र चन्द्रिकया मलयवत्या निशामुखेन चन्दनलतागृहस्य औपम्यमनुसन्धेयं प्रीतिदायित्वं हि साधारणो धर्मः । "साधर्म्यमुपमा भेदे" इति मम्मटः । अत्रापि वृत्तमार्या । (३)

चेटी। (दृष्ट्वा) भट्टिदारिए दिट्ठिआ वड्ढसि। सो एव्व णं दे हिअअवल्लहो जणो॥ (१)

नायिका। (दृष्ट्वा सहर्षं ससाध्वसञ्च) हञ्जे एदं पेक्खिअ अदिसज्झसेण ण सक्कुणोमि इह एव्व आसणे चिट्ठिदुं। कदापि एसो पेक्खदि। ता एहि अण्णदो गच्छह्म। (सोत्कण्ठं पदं गत्वा) हञ्जे वेवदि मे ऊरू॥ (२)

चेटी। (विहस्य) अइ कादरे इह ट्ठिदं तुमं को पेक्खदि। णं विसुमरिदो दे अअं रत्तासोअपादवो। ता इह एव्व उवविसिअ चिट्ठह्म। (तथा कुरुतः)॥ (३)

विदू। (निरूप्य)। भो वअस्स। एसा सा चन्दणमणिसिला॥ (४)

नायकः। सबाष्पं निश्वसिति॥

---

(१) भर्तृदारिके दिष्ट्या वर्द्धसे। स एव ननु ते हृदयवल्लभो जनः। *

(२) हञ्जे एनं प्रेक्ष्य अतिसाध्वसेन न शक्नोमि इहैवासने स्थातुम्। कदापि एष प्रेक्षते। तदेहि अन्यतो गच्छावः। हञ्जे वेपेते मे ऊरू।

(३) अयि कातरे इह स्थितां त्वां कः प्रेक्षते। ननु विस्मृतस्ते अयं रक्ताशोकपादपः। तदिहैव उपविश्य तिष्ठावः।

(४) भो वयस्य। एषा सा चन्द्रमणिशिला।

---

* दिष्ट्या इति हर्षोत्कान्तमव्ययं भाग्येनेत्यर्थः। वर्द्धसे इति अभ्युदयमित्यर्थः प्राप्नोषि। नन्वित्यवधारणे। स एव यः पूर्वमत्र त्वया दृष्ट इत्यर्थः।

चेटी । भट्टिदारिए जाणामि सिविणआलावो विअ ता अवहिदा दाव सुणह्म । (१) (उभे आकर्णयतः) ॥

विदू । (हस्तेन चालयन्) भो वअस्स ! णं भणामि एसा सा चन्दमणिसिलेत्ति ॥ (२)

नायकः । (सवाष्पं निश्वस्य) सम्यगुपलक्षितं । (हस्तेन निर्द्दिश्य) ॥

शशिमणिशिला सेयं यस्यां विपाण्डुरमाननं
करकिसलये कृत्वा वामे घनश्वसितोद्‌गमा ।
चिरयति मयि व्यक्ताकूता मनाक् स्फुरिताधरा
विरमितमनोमन्युर्दृष्टा मया रुदती प्रिया ॥ (३)

---

(१) भर्त्तृदारिके ! जानामि स्वप्नालाप इव । तदवहिते तावच्छृणुवः ।
(२) भो वयस्य ! ननु भणामि एषा सा चन्द्रमणिशिलेति ।

शशीति । सा स्वप्नानुभूतेत्यर्थः इयं पुरो दृश्यमाना शशिमणिशिला वर्त्तत इति शेषः, यस्यां शिलायां वामे करकिसलये करः किसलयं नवपल्लवमिव "पल्लवोऽस्त्रीकिसलय"मित्यमरः, तस्मिन् विपाण्डुरं अतिशयपाण्डुवर्णं (पाण्डुशब्दादस्त्यर्थे रः) आननं कृत्वा स्थापयित्वा घनश्वसितोद्गमा घनः मुहुर्मुहुः श्वसितानां निश्वासानां उद्गमो यस्याः सा चिरयति विलम्बयति मयि विषये व्यक्ताकूता व्यक्तं प्रकटीकृतं आकूतं मनोरथः यस्याः सा तथोक्ता मनाक् ईषत् स्फुरिताधरा स्फुरितौ अधरौ ओष्ठौ यस्याः सा तथोक्ता "अधरस्तु पुमानोष्ठे हीनेऽनूर्द्ध्वे तु वाच्यव"दिति मेदिनी, विरमितमनोमन्युः विरमितं प्रापितविरति मनो येन स तथोक्तः मन्युः दैन्यं यस्याः सा तथोक्ता "मन्युर्दैन्ये क्रतौ क्रुधी"ति कोषः, प्रिया रुदती सती मया कल्ये दृष्टा । अत्र हरिणीवृत्तं तल्लक्षणं यथा "नसमरसलागैः षड्वेदैर्हयैर्हरिणी मते"ति । (३)

ततस्तस्यामेव चन्द्रमणिशिलायां उपविशाव: (उभावुपविशतः)।

नायिका। (विचिन्त्य) का उण एसा हुविस्सदि। (१)

चेटी। भट्टिदारिए। जधा अज्जो ओवारिदा दाव एदं पेक्खह्म। मा णाम तुमम्पि एव्वं दिट्ठा॥ (२)

नायिका। जुज्जदि एदं। किं उण पणअकुविदं पिअ-अणं हिअए करिअ मन्तेदि॥ (३)

चेटी। भट्टिदारिए मा ईदिसं सङ्कं करेहि। पुणोवि दाव सुणह्म॥ (४)

---

(१) का पुनरेषा भविष्यति। *

(२) भर्तृदारिके! यथा आर्यो अपवारिते तावत् एनं प्रेक्षावहे मा नाम त्वमपि एवं दृष्टा। †

(३) युज्यते एतत्। किं पुनः प्रणयकुपितं प्रियजनं हृदये कृत्वा मन्त्रयते। ‡

(४) भर्तृदारिके मा ईदृशीं शङ्कां कुरुष्व। पुनरपि तावत् शृणुवः। §

---

* का किन्नामधेया एषा या स्वप्ने अनेन दृष्टेत्यर्थः।

† मा इति निषेधे। नाम सम्भावनायां। एवं कातरेत्यर्थः।

‡ एतत् यत् त्वयोक्तमित्यर्थः, युज्यते न्यायानुगतं भवतीत्यर्थः नाहं दर्शनमस्य दास्यामीति भावः। प्रियजनं प्रियतमामित्यर्थः हृदये कृत्वा उद्दिश्यैवेत्यर्थः कापि कामिनी अस्य मनोत्वेन निश्चिता विद्यते तामेव प्रणयकुपिताञ्चिन्तयन्नेव मन्त्रयते इति भावः।

§ मा ईदृशीं अस्य कृतदारत्वरूपां शङ्कां वितर्कं "शङ्का भयवितर्कयो"रित्यमरः, कुरु त्वमिति शेषः।

विदू । (आत्मगतम्) अहिरमदि एसो एदाए कधाए । भोदु एदं एव्व वड्ढाविस्सं । (प्रकाशम्) भो वअस्स ! तदा सा तुए रुदती किं भणिदा । (१)

नायकः । वयस्य इदमुक्ता ।

निष्यन्दत इवानेन मुखचन्द्रोदयेन ते ।
एतद्बाष्पाम्बुना सिक्तं चन्द्रकान्तशिलातलं ॥ २ ॥

नायिका । (सरोषम्) चदुरिए ! अत्थि किं अदोवि अवरं सोदव्वं । ता एहि गच्छम्ह अण्णदो । (२)

---

(१) अभिरमते एष एतया कथया । भवतु एतामेव वर्द्धयिष्यामि । भो वयस्य ! तदा सा त्वया रुदती किं भणिता । *

(२) चतुरिके ! अस्ति किमतोऽप्यपरं श्रोतव्यं । तदेहि गच्छामोऽन्यतः । †

---

* एतया कामिनीसम्बद्धयेत्यर्थः । एतां कथामेव वर्द्धयिष्यामि कथयिष्यामीत्यर्थः ।

निष्यन्दतेति । ते तव अनेन मुखचन्द्रोदयेन मुखमेव चन्द्रः तस्य उदयेन (नतु मुखं चन्द्र इव उदयक्रियया चन्द्रस्यैव मुख्यत्वेनान्वयादित्यनुसन्धेयमिति) क्षेतना बाष्पाम्बुना अश्रुणा सिक्तमार्द्रीकृतमेतत् चन्द्रकान्तशिलातलं निष्यन्दते क्षरतीव चन्द्रोदये चन्द्रमणेः क्षरणं लोकप्रसिद्धम् । अत्र शिलायाः अश्रुसिक्तत्वं चन्द्रोदयारब्धजलक्षरणत्वेनोत्प्रेक्षितमिति उत्प्रेक्षालङ्कारः तदुक्तं "सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन य" इति । (२)

† किमतः अपरं अन्यत् श्रोतव्यमस्ति नेत्यर्थः अनेनैवास्यान्यकामिन्यासक्तत्वं प्रमाणीकृतमिति भावः ।

चेटी। (सकौतुकम्) भट्टिदारिए ! एव्वं मा भण। तुमं एव्व सिविणए दिट्ठा। ण एदस्स अण्णस्सिं दिट्ठी अहिरमदि ॥ (१)

नायिका। ण मे हिअअं पत्तिआअदि। ता कहावसाणं दाव पडिपालेह्म ॥ (२)

नायकः। वयस्य जानि तामेवास्यां शिलायामालिख्य तया चित्रगतया आत्मानं विनोदयामीति। तदित एव गिरितटान्मनःशिलाशकलान्यादायागच्छ ॥ (३)

विदू। जं भवं आणवेदि। (परिक्रम्य सकौतुकमुपसृत्य) भो

---

(१) भर्तृदारिके ! एवं मा भण। त्वमेव स्वप्ने दृष्टा न एतस्य अन्यस्यां दृष्टिरभिरमते।

(२) न मे हृदयं प्रत्येति। तत् कथावसानं तावत् प्रतिपालयावः। *

---

* कथावसानं तावत् कथाशेषपर्य्यन्तमित्यर्थः तावदित्यत्र अवधौ "यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः।

तां यथादृष्टां कामिनीमेव शिलायां आलिख्य चित्रयित्वा चित्रगतया आलेख्यस्थितया तया हेतुभूतया आत्मानं विनोदयामि निर्वृतिं प्रापयामि। चित्रस्य विरहिविनोदनत्वं यथा "वियोगावस्थासु प्रियजनसदृक्षानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि। तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि प्रतीकारः कामव्यथितमनसां कोऽपि कथितः" इति मल्लिनाथः। तत् तस्मात् इतः अस्मात् एव गिरितटात् पर्वतपादात् मनःशिलाशकलानि धातुविशेषखण्डानि "धातुर्मनःशिलाद्यद्रेः" "भित्तं शकलखण्डे वे"त्युभयत्राप्यमरः। (३)

वअस्स ! तुए एक्को वस्सओ आणत्तो मए उण इह एव्व सुलह-पज्जराइणो वस्सआ आणीदेत्ति । आलिहदु भवं (उपनयति) ॥ (१)

नायकः। वयस्य साधु कृतम् । (गृहीत्वा चित्रफलकमालिखन् सरोमाञ्चम्) सखे पश्य,

अक्लिष्टबिम्बशोभाधरस्य नयनोत्सवस्य शशिन इव ।
दयितामुखस्य सुखयति रेखापि प्रथमदृष्टेयम् ॥ २ ॥ (लिखति)॥

विदू। (सकौतुकं निर्वर्ण्य) अप्पत्तक्खेऽवि एव्वं णाम रूअं लिहीअदि । अहो अच्छरिअं ॥ (२)

---

(१) यद्भवान् आज्ञापयति । भो वयस्य ! त्वया एको वर्ण आज्ञप्तः मया पुनरिहैव सुलभपञ्जरागिणो वर्णा आनीता इति आलिखतु भवान् । *

(२) अप्रत्यक्षेऽपि एवं नाम रूपं लिख्यते । अहो आश्चर्यम् । †

---

* सुलभपञ्जरागिणः सुलभा अनायाससाध्याः पञ्जरागा रक्तादयो विद्यन्ते येषां ते तथोक्ताः ।

अक्लिष्टेति । अक्लिष्टबिम्बशोभाधरस्य धरतीति धरं (पचाद्यच्) अक्लिष्टस्य अपर्युषितस्य बिम्बस्य रक्तवर्णफलविशेषस्य शोभायाः धरं तस्य नयनोत्सवस्य नयनानन्दकस्य दयितामुखस्य प्रियाननस्य शशिनः चन्द्रस्येव प्रथमदृष्टा इयं रेखापि सुखयति सुखीकरोति । यथा चन्द्रस्य एकापि कला उदिता सती जनानां नयनानन्दकरी भवति तद्वत् प्रिया-मुखस्य प्रथमालिखिता रेखापि सुखाय भवतीति भावः । अत्रोपमाल-ङ्कारः । (cf. "प्रथममल्पमपायसुस्थितं प्रतिपच्चन्द्रमिव प्रजा नृप"मिति किरातार्जुनीयम्) अत्रापि आर्यावृत्तम् । (२)

† अप्रत्यक्षे स्वरूपतोऽदृष्टेऽपि अत्र कयाचित्सख्या दर्शनादित्यर्थः ।

नायकः। (सस्मितम्) वयस्य

प्रिया सन्निहितैवेयं सङ्कल्पस्थापिता पुरः।
दृष्ट्वा दृष्ट्वा लिखाम्येनां यदि तत् कोऽत्र विस्मयः॥१॥

नायिका। (साखम्) चदुरिए! जाणिदं क्खु कहावसाणं। ता एहि दाव मित्तावसुं पेक्खम्ह॥ (२)

चेटी। (सविषादमात्मगतम्) जीविदणिरवेक्खो विअ से उल्लावो। (प्रकाशम्) भट्टिदारिए! णं गदा एव्व तहिं मणोहारिआ। ता कदापि भट्टा मित्तावसू इह एव्व आअच्छदि॥ (३)

(ततः प्रविशति मित्रावसुः)

मित्रा। आज्ञापितोऽस्मि तातेन। यथा वत्स मित्रावसो जीमूतवाहनोऽस्माभिरिहासन्नभावात् सुपरीक्षितोऽयं। कुतो-

(२) चतुरिके! ज्ञातं खलु कथावसानं। तदेहि तावत् मित्रावसुं प्रेक्षावहे।

(३) जीवितनिरपेक्ष इवास्या उल्लापः। भर्तृदारिके! ननु गतैव तत्र मनोहरिका। तत् कदापि भर्त्ता मित्रावसुरिहैवागच्छति। *

सस्मितं ईषद्धास्यसहितं "ईषद्धास्यः स मनाक् स्मित"मित्यमरः। प्रियेति। इयं सङ्कल्पस्थापिता मानसारोपिता यद्यपि सा बहिर्न दृश्यतेऽधुना तथापि मनसि स्थितैवेत्यर्थः, प्रिया पुरः ममाग्रे सन्निहिता स्थिता एव। दृष्ट्वा एनां प्रियां लिखामि यदि तत् तदा अत्र लिखने कः विस्मयः अद्भुतत्वमस्तीति शेषः न कोऽपीत्यर्थः। (१)

* अस्या मलयवत्या उल्लापः स्वरविकारः जीवितनिरपेक्षः स्वजीवने अनास्थाद्योतक इव। तत्र मित्रावसुसकाशे इत्यर्थः। मनोहरिका काचित् किङ्करी।

ऽस्मा योग्यो वरः। तदस्मै वत्सा मलयवती प्रतिपाद्यतामिति। अहन्तु स्नेहपराधीनतया अन्यदेव किमप्यवस्थान्तरमनुभवामि॥ (१) कुतः

यद्विद्याधरराजवंशतिलकः प्राज्ञः सतां सम्मतो
रूपेणाप्रतिमः पराक्रमधनो विद्वान् विनीतो युवा।
यश्चासूनपि सन्त्यजेत् करुणया सत्त्वार्थमभ्युद्यत
स्तेनास्मै ददतः स्वसारमतुलां तुष्टिर्विषादश्च मे॥२॥

सुपरीक्षितः दयादाक्षिण्यसुशीलत्वादिषु गुणेषु इति भावः। अस्मात् जीमूतवाहनात्। प्रतिपाद्यतां दीयतां "त्यागो विहायनं दानमुत्सर्जनविसर्जने। विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्" इत्यमरः। अवस्थान्तरं विषादं अतःपरं वक्ष्यमाणेभ्यो विशिष्टत्वादिति। (१)

यदिति। यद् विद्याधरराजवंशतिलकः विद्याधरराजकुलश्रेष्ठ इत्यर्थः प्राज्ञः प्रकृष्टज्ञानसम्पन्नः (प्रज्ञादित्वात् स्वार्थे अण्) सतां साधूनां सम्मतः पूजितः (मतिबुद्धीत्यादिना वर्त्तमाने क्तः क्तस्य च वर्त्तमाने इति कर्त्तरि षष्ठी) रूपेण आकारसौन्दर्य्येण अप्रतिमः तुल्यरहितः पराक्रमधनः पराक्रम एव धनं यस्य स अतिशौर्य्यशालीत्यर्थः विद्वान् शास्त्रज्ञानसम्पन्नः विनीतः निसर्गसंस्काराभ्यां नम्रस्वभावः युवा यौवनसम्पन्नः नव इह इत्यर्थः अयं ईदृग्गुणग्रामशाली भवतीत्यर्थः। अन्यच्च करुणया कृपया (हेताविति तृतीया) सत्त्वार्थं प्राणिनां हितार्थमभ्युद्यतः उद्युक्तः सन् असून् प्राणानपि यः सन्त्यजेत प्राणपरित्यागेनापि परहितकारीत्यर्थः तेन पर्य्युक्तगुणसम्पन्नत्वेन हेतुनेत्यर्थः अस्मै जीमूतवाहनायेत्यर्थः अतुलां अलौकिकरूपवतीं स्वसारं भगिनीं ददतः मे मम तुष्टिः सन्तोषः भवतीति शेषः विषादः अस्तु विरहजनित इत्यर्थः च भवतीति शेषः। कदापि परहितार्थमयं प्राणां स्त्यजेत्तदा वैधव्यदुःखमनुभविष्यति मे स्वसेति भावः। अत्रापि वृत्तं शार्दूलविक्रीडितम्। (२)

श्रुतञ्च यथा जीमूतवाहनो गौरीश्रमसम्बद्धे चन्दनलतागृहे वर्त्तत इति। तदेतत् चन्दनलतागृहं। यावत् प्रविशामि। (प्रविशति)।

विदू। (ससम्भ्रममवलोक्य) भो वअस्स। पच्छादेहि इमिणा कअलीवत्तेण इमं चित्तगदं कण्णअं। एसो क्खु सिद्धजुवराओ मित्तावसू इह आगदो कदावि पेक्खिस्सदि। (१)

नायकः। (कदलीपत्रेण प्रच्छादयति)॥

मित्रा। (प्रविश्य) कुमार मित्रावसुः प्रणमति॥

नायकः। (दृष्ट्वा) मित्रावसो स्वागतम्। इतः स्थीयताम्।

चेटी। भट्टिदारिए! आअदो भट्टा मित्तावसू॥ (२)

नायिका। हञ्जे पिअं मे। (३)

नायकः। मित्रावसो अपि कुशली सिद्धराजो विश्वावसुः।

मित्रा। कुशली। तातसन्देशेनास्मि त्वत्सकाशमागतः॥

नायकः। किमाह तत्रभवान्॥ (४)

नायिका। सुणिस्सं दाव किं तादेण कुसलं संदिट्ठं त्ति॥ (५)

---

(१) भो वयस्य! प्रच्छादय अनेन कदलीपत्रेण इमां चित्रगतां कन्यकां। एष खलु सिद्धयुवराजो मित्रावसुरिहागतः कदापि प्रेक्षिष्यते।

(२) भर्तृदारिके! आगतो भर्त्ता मित्रावसुः।

(३) हञ्जे! प्रियं मे।

(५) श्रोष्यामि तावत् किं तातेन कुशलं सन्दिष्टमिति।

तत्रभवान् पूज्यः "अथ तत्रभवानत्रभवान् पूज्य" इति। (४)

मित्रा। (आत्मगतम्) इदमाह तातः। अस्ति मे मलयवती नाम कन्या जीवितमिवास्य सर्वस्यैव सिद्धराजान्वयस्य। सा मया तुभ्यं प्रतिपाद्यते प्रतिगृह्यताम् इति। (१)

चेटी। (विहस्य) भट्टिदारिए! किं ण कुप्पसि दाणीं। (२)

नायिका। (सस्मितं सलज्जञ्च अधोमुखी स्थिता) हञ्जे मा हस। किं विसुमरिदं दे एदस्स अण्णहिअअत्तणं। (३)

नायकः। (अपवार्य्य) वयस्य सङ्कटे पतिताः स्मः। (४)

विद्। (अपवार्य्य) भो जाणामि ण तं वज्जिअ दे अण्णेहिं चित्तं अहिरमेदि। जधा तधा जं किम्पि भणिअ विसज्जीअदु एसो। (५)

नायिका। (सरोषमात्मगतम्) हदास को वा एदं ण जाणादि। (६)

---

(२) भर्तृदारिके! किं न कुप्यसीदानीं।

(३) हञ्जे! मा हस। किं विस्मृतं ते एतस्यान्यहृदयत्वं।

(५) भो जानामि। न तां वर्जयित्वा ते अन्यत्र चित्तमभिरमते। यथा तथा यत् किमपि भणित्वा विसर्ज्यतामेषः। *

(६) हताश को वा एतन्न जानाति। †

तातः पिता "तातः पितरि वत्सले" इत्यमरः। अस्य सर्वस्य सिद्धराजान्वयस्य सिद्धराजवंशीयानां जनानामित्यर्थः (अत्रान्वयशब्देन तत्स्थजनेषु लक्षणा) जीवितं प्राणा इव अतिप्रियेत्यर्थः। (१)

सङ्कटे विपदीत्यर्थः कथं वा मलयवतीप्रत्याख्यानेन अस्य वाक्यं पालयामि कथं वा एनं प्रत्याख्यास्यामि इति। (४)

* यथा तथा यत् किमपि भणित्वा येन केनाप्यपदेशेनेत्यर्थः।

† एतं विषयवस्तुमित्यर्थः। नेह यत्र सम्बन्धकरणे कथमिदानीं अन्यचेता भवतीति मलयवत्या अभिप्रायः।

नायकः। क इह नेच्छेद् भवद्भिः सह श्लाघ्यमीदृशं सम्बन्धं। किन्तु न शक्यते चित्तमन्यतः प्रवृत्तमन्यतः प्रवर्त्तयितुम्। ततो नाहमेनां प्रतिग्रहीतुमुत्सहे॥ (१)

नायिका। (मूर्च्छां नाटयति)॥ *

चेटी। समस्ससदु समस्ससदु भट्टिदारिआ॥ (२)

विट। भो पराधीणो क्खु एसो। किं एदिणा अब्भत्थिदेण ता गुरुअणं से गदुअ अब्भत्थेहि॥ (३)

मित्रा। (आत्मगतम्) साधूक्तं। नायं गुरुजनमतिक्रा-

---

(२) समाश्वसितु समाश्वसितु भर्तृदारिका।

(३) भो पराधीनः खलु एषः। किमनेनाभ्यर्थितेन। तद्गुरुजनमस्य गत्वा अभ्यर्थय।

इह अत्र लोके कः जनः भवद्भिः सह ईदृशं श्लाघ्यं प्रशस्यं सम्बन्धं वैवाहिकमित्यर्थः न इच्छेत् (सम्भावनायां लिङ्) अपि तु सर्वं एव इच्छेदिति भावः। किन्तु भवद्भिः सम्बन्धस्यातिश्लाघ्यत्वेऽपि अन्यतः अन्यस्मिन् विषये प्रवृत्तं आसक्तं चित्तं मनः अन्यतः तदितरस्मिन् वस्तुनि प्रवर्त्तयितुं आसञ्जयितुं न शक्यते। ततः तस्मात् मच्चित्तस्यान्यस्मिन् प्रवृत्तत्वात् हेतोः अहं एनां कन्यां प्रतिग्रहीतुं विवाहरूपेण स्वीकर्तुं न उत्सहे अभिलषामीत्यर्थः। (१)

* मूर्च्छां जीमूतवाहनकर्तृकप्रत्याख्यानवचनश्रवणजनितामित्यर्थः।

आत्मगतमिति तेषां वाक्येषु अनास्थापरो भवतीत्यर्थः। पित्रा इत्यत्र प्रयोज्ये कर्त्तरि तृतीया "गतिबुद्धीत्यादि सूत्रे ग्रहधातोरग्रहणाण्णिकर्त्तुः कर्मत्वमिति पाणिनीयाः वोपदेवमते तु सूत्रे ग्रहधातोः प्रयोगाद्णिकर्त्तुः कर्मत्वं स्यादेवेति। अथवा णिजन्तात् ग्रहेः

मति। एष गुरुरप्यस्मिन्नेव गौर्याश्रमे प्रतिवसति। तद् यावद्गत्वा अस्य पित्रा मलयवतीं ग्राहयामि॥ (१)

नायिका। (समाश्वसिति)॥

मित्रा। एवं निवेदितात्मनोऽस्मात् प्रत्याचक्षाणः कुमार एव बहुतरं जानाति। (२)

नायिका। (सरोषं विहस्य) कहं पच्चाक्खाणलहु मित्तावसू पुणोवि मन्तेदि। (३)

(मित्रावसुर्निष्क्रान्तः)

नायिका। (आत्मगतं सास्रमात्मानं पश्यन्ती) किं मम एदिणा दोहग्गकलङ्कमइलेण अच्चन्तदुक्खभाइणा अज्जवि सरीरेण धारिदेण। ता इध ज्जेव्व असोअपाअवे इमाए

---

(३) कथं प्रत्याख्यानलघुर्मित्रावसुः पुनरपि मन्त्रयते।

पुनर्णिच्करणात् पित्रेत्यत्र न द्वितीया, अस्य निष्कर्षो यथा जीमूतवाहनः गृह्णाति, पिता जीमूतवाहनं जीमूतवाहनेन वा ग्राहयति, अहं पित्रा जीमूतवाहनं जीमूतवाहनेन वा ग्राहयामि मलयवतीमिति शेषः। पक्षेऽपि ग्रहणमात्रार्थकत्वे पूर्वः पक्षः श्रेयान् विवाहकरणार्थत्वे तु द्वितीयः पक्षः साधीयानिति। (१)

एवं पूर्वोक्तप्रकारेण निवेदितात्मनःकथितस्वभावात् "आत्मा देहे धृतौ जीवे स्वभावे परमात्मनी"ति विश्वः, अस्मात् प्रत्याचक्षाणः प्रत्यादिशन् अस्वीकुर्वन्नवमन्यमान इत्यर्थः कुमार एव बहुतरं जानाति कारणादिकमित्यर्थः वयन्तु न किञ्चिदपि बुध्यामहे इत्यर्थः। इयमस्य सरोषोक्तिरित्यनुसन्धेयम्। (२)

अदिमुत्तलदाए उब्बन्धिअ अत्ताणं वावादइस्सं। ता एदं एव्वं दाव। (प्रकाशं विलक्षस्मितेन) हञ्जे! पेक्ख दाव मित्तावसू गदो ण वेत्ति। जेण अहम्मि इदो गमिस्सं॥ (१)

चेटी। (कतिचित् पदानि गत्वा अवलोक्य आत्मगतम्) असारिसं से हिअअं पेक्खामि। ता ण गमिस्सं। इह ज्जेव्व ओवारिदा पेक्खामि किं एसा पडिवज्जदित्ति॥ (२)

नायिका। (दिशोऽवलोक्य पाशं गृहीत्वा साश्रम्) भअवदि गोरिये तुए इह ण किदो। ता अण्णस्सिम्पि जम्मन्तरे जधा ण

---

(१) किं मम एतेन दौर्भाग्यमलिनेन अत्यन्तदुःखभागिना अद्यापि शरीरेण धारितेन तदिहैव अशोकपादपे अनया अतिमुक्तलतया उद्बध्य आत्मानं व्यापादयिष्यामि। तदिदमेवन्तावत्। हञ्जे! प्रेक्षस्व तावत् मित्रावसुर्गतो नवेति। येन अहमपि इतो गमिष्यामि। *

(२) अन्यादृशमस्या हृदयं प्रेक्षे तन्न गमिष्यामि। इहैवापवारिता प्रेक्षे किमेषा प्रतिपद्यते इति। †

---

* दौर्भाग्यमलिनेन दौर्भाग्येण जीमूतवाहनेन मत्पाणिग्रहणास्वीकाररूपेण मलिनं दूषितमित्यर्थः तेन। अतएव अत्यन्तदुःखभागिना। अद्यापि अनेन मत्पाणिग्रहणास्वीकारात् परमपीत्यर्थः। धारितेन रक्षितेन किं प्रयोजनमस्तीत्यर्थः। अशोकपादपे स्वनामख्यातवृक्षविशेषे पादेन शिफासङ्घातेन पिबतीति पादपः। अतिमुक्तलतया माधवीलतया उद्बन्धनरज्जुभूतयेत्यर्थः " अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता" इत्यमरः। उद्बध्य गले रज्जुं बद्ध्वा हत्वेत्यर्थः।

† अन्यादृशं विकृतिमापन्नमित्यर्थः। अपवारिता अस्यै दर्शनमददती। प्रतिपद्यते करोति।

ईदिसी दुक्खभाइणी होमि तधा करेसि। (इत्यभिधाय कण्ठे पाशमर्पयति) ॥ (१)

चेटी। (दृष्ट्वा ससम्भ्रमसुपसृत्य) परित्ताअदु परित्ताअदु अज्जो। एसो भट्टिदारिआ उव्वन्धिअ अत्ताणअं वावादेदि ॥(२)

नायकः। (ससम्भ्रममुपसृत्य) कासौ कासौ। (३)

चेटी। इअं असोअपादवे ॥ (४)

नायकः। (सहर्षमवलोक्य) सैवेयमस्मन्मनोरथभूमिः ॥ (५)

(नायिकां पाणौ गृहीत्वा लतापाशमाक्षिपति) ॥

न खलु न खलु मुग्धे साहसं कार्य्यमीदृक्

व्यपनय करमेतं पल्लवाभं लतायाः।

---

(१) भगवति गौरि त्वया इह न कृतम् ‡। तदन्यस्मिन्नपि जन्मान्तरे यथा न ईदृशी दुःखभागिनी भवामि तथा करिष्यसि।

(२) परित्रायतां परित्रायतामार्य्यः *। एषा भर्त्तृदारिका उद्बध्य आत्मानं व्यापादयति।

(४) इयमशोकपादपे। †

---

‡ इह अस्मिन् जन्मनीत्यर्थः। कृतं मनोरथसम्पादनमिति शेषः।

* परित्रायतां रक्षतु अस्मात् उपस्थितात् सङ्कटादिति शेषः।

क कुत्र असौ तव भर्त्तृदारिकेत्यर्थः वर्त्तते इति शेषः। (३)

† अशोकपादपे तत्समीपं आस्ते इति शेषः।

अस्मन्मनोरथभूमिः अस्माकं अभिलाषचरितार्थास्पदं या मया स्वप्ने दृष्टेत्यर्थः। (पाशाद्विश्लेष अवच्छेदे सप्तमी) आक्षिपति दूरीकरोति। (५)

नेति। हे मुग्धे! मूढे "मुग्धस्तु सुन्दरे मूढे" इति मेदिनी, न खलु न खलु नहि नहि ईदृक् दारुणमित्यर्थः साहसं अविमृश्य-कारित्वं कार्य्यं त्वयेति शेषः। लतायाः पल्लवाभं अतिकोमलमित्यर्थः

कुसुममपि विचेतुं यो न मन्ये समर्थः
कलयति स कथन्ते पाशमुद्बन्धनाय ॥ १ ॥

नायिका । (ससाध्वसम्) हञ्जे ! को उण एसो (निरूप्य करोचं हस्तमाक्षिप्य मोचयितुमिच्छति) मुञ्च मुञ्च अग्गहत्थम् । को तुमं णिवारेदुं । मरणेवि किं तुमं ज्जेव्व अब्भत्थणीओ ॥ (२)

नायकः । कण्ठे हारलतायोग्ये येन पाशस्त्वयार्पितः ।
गृहीतः सापराधोऽयं कथन्ते मुच्यते करः ॥ २ ॥

---

(२) हञ्जे ! कः पुनरेषः । मुञ्च मुञ्चाग्रहस्तम् । कस्त्वं निवारयितुं । मरणेऽपि किं त्वमेवाभ्यर्थनीयः । *

एतं करं हस्तं व्यपनय गले रज्जुप्रदानात् अपसारयेत्यर्थो त्वमिति शेषः अथवा पल्लवाभमेतं करं लतायाः लतापाशात् व्यपनय । कुसुमं पुष्पं अतिकोमलमपि विचेतुं यः कर इत्यर्थः न समर्थः शक्तः इति मन्ये अहमिति शेषः पुष्पचयनेऽपि यः क्लिष्टो भवतीत्यर्थः स तादृशः ते तव कर इति शेषः उद्बन्धनाय उद्बन्धुमित्यर्थः (तुमर्थाच्च भाववचनादिति चतुर्थी) कथं पाशं रज्जुं कलयति गृह्णाति अतिकर्कशत्वाद्र पाशस्यायोग्य इति भावः (कश्चिच्छलीकामधेनु इति कवेर्दक्षयार्थत्वमिति) अत्र मालिनीवृत्तं तल्लक्षणं यथा "ननमयययुतेयं मालिनी भोगिलोकै" रिति । (१)

* मरणे मृत्युविषयेऽपि किं त्वमेव अभ्यर्थनीयः किं त्वदनुमतिं विना मर्तुमप्यहं न शक्नोमीति भावः ।

कण्ठे इति । हारलतायोग्ये मौक्तिकादिहारमालोद्वहनसमर्थे इत्यर्थः कण्ठे तवेति शेषः त्वया कलत्री येन हस्तेन करेण पाशः रज्जुः अर्पितः दत्तः ते तव अयं सापराधः अपराधेन कोमलवस्तुनि कर्कशद्रव्यार्पणरूपेण सह वर्त्तमानः करः हस्तः गृहीतः धृतः सन् मयेति शेषः कथं मुच्यते परित्यज्यते न कथमपीति भावः, कृतापराधानां राज्ञा दण्ड-

विदू। भोदु। किं उण से इमस्स मरणव्ववसाअस्स कारणं॥ (१)

चेटी। णं एसो एव्व दे पिअवअस्सो। (२)

नायकः। कथमहमेवास्या मरणकारणम् न खल्ववगच्छामि॥

विदू। भोदि कहं विअ॥ (३)

चेटी। (साकूतम्) जा सा पिअवअस्सेण दे कावि हिअअवल्लहा सिलाअले आलिहिआ ताए पक्खवादिणा एदेण पडिवादअन्तस्स वि मित्तावसुणो णाहं पडिच्छिदेत्ति जाद-णिव्वेदाए इमाए एव्वं ववसिदं॥ (४)

नायकः। (सहर्षमात्मगतम्) कथमियमेवासौ विश्वावसो

---

(१) भवतु किं पुनरस्या अस्य मरणव्यवसायस्य कारणम्।

(२) नन्वेष एव ते प्रियवयस्यः।

(३) भवति कथमिव।

(४) या सा प्रियवयस्येन ते कापि हृदयवल्लभा शिलातले आलि-खिता। तस्याः पक्षपातिना एतेन प्रतिपादयतोऽपि मित्रावसोर्नाहं प्रतीष्टेति जातनिर्वेदया अनया एवं व्यवसितम्। *

स्यादित्याशयः। यथा कश्चित् चौरादिकः राजपुरुषैः धृतः सन् कथमपि न त्यज्यते अपि तु राजसमीपं नीत्वा दण्डाद्यैः क्रियते तद्वदित्यर्थः। अत्र विशेषणमहिम्ना चौराद्यप्रस्तुतार्थप्रतीतेः समासोक्तिरलङ्कारः तदुक्तं "परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिर्निगद्यते" इति मम्मटः। (१)

* साकूतं आकूतेन भावविशेषेण सह वर्त्तमानं। तस्याः शिलातलालिखितायाः इत्यर्थः। पक्षपातिना तस्यां स्निह्यतेत्यर्थः। एतेन तव वयस्येन प्रतिपादयतः स्वहस्तायेति एनं प्रार्थयमानस्यापीत्यर्थः मित्रावसोः अहं न प्रतीष्टा स्वीकृता इति हेतोः जातनिर्वेदया जातस्वावमानया "निर्वेदः

दुःखिता मलयवती। अथवा रत्नाकरादृते कुतश्चन्द्रलेखायाः प्रसूतिः। हा कथं वञ्चितोऽस्म्यनया। (१)

विदू। भोदि यदि एव्वं ता अणवरद्धो दाणिं पिअवअस्सो। अहवा जइ मम ण पत्तिआअसि तदा सअं ज्जेव्व सिलाअलं गदुअ पेक्खदु भोदी॥ (२)

नायिका। (सहर्षं सलज्जञ्च नायकं पश्यन्ती हस्तमाकर्षति)॥

नायकः। (सस्मितम्) न तावन्मुञ्चामि यावन्मम हृदयवल्लभां शिलायामालिख्यगतां न पश्यसि॥ (३)

(सर्वे परिक्रामन्ति)॥

विदू। (कदलीपत्रमपनीय) भोदि पेक्ख एदं से हिअअवल्लहं जणं। (४)

---

(२) भवति यद्येवं तदनपराद्ध इदानीं प्रियवयस्यः *। अथवा यदि मम न प्रत्येषि तदा स्वयमेव शिलातलं गत्वा प्रेक्षतां भवती।

(४) भवति प्रेक्षस्व प्रेक्षस्व एतमस्य हृदयवल्लभं जनं॥

स्वायमानन"मिति कोषः, अनया मत्प्रियवयस्या एवं स्वजीवनपरित्याग-रूपमित्यर्थः व्यवसितमङ्गीकृतम्। रत्नाकरात् समुद्रात् "रत्नाकरो जलनिधि"रित्यमरः, ऋते अन्यत इत्यर्थः कुतः कस्मात् स्थानात् चन्द्रलेखायाः चन्द्रकलायाः प्रसूतिः उत्पत्तिर्भवतीति शेषः न कुतश्चिदित्यर्थः ("जनिकर्तुः प्रकृति" इति अपादानत्वम्) अत्र रत्नाकरात् विश्वावसोः चन्द्रकलायाः मलयवत्या भेदेऽप्यभेदाध्यवसायात् अतिशयोक्तिः लक्षणमुक्तं प्राक्। (१)

* अनपराद्धः मलयवत्या एव चित्रकरणादित्यर्थः।

मुञ्चामि त्यजामि तव हस्तमिति शेषः। तावत् यावत् इत्यत्रावधौ। आलेख्यगतां चित्रार्पितामित्यर्थः। (३)

नायिका । (निरूप्य अपवार्य सस्मितं) चदुरिए ! अहं विअ आलिहिदा ॥ (१)

चेटी । (चित्राकृतिं नायिकाञ्च निर्वर्ण्य) भट्टिदारिए ! किं भणासि अहं विअ आलिहिदेत्ति । इदिसं सोसारिच्छं जेण ण जाणीअदि किं दाव इह ज्जेव्व सिलाअले भट्टिदारिआए पड़िविम्बं संकन्तं । णादु तुमं अलिहिदेत्ति ॥ (२)

नायिका । (विहस्य) हञ्जे ! दुज्जणीकदह्मि इमिणा मं चित्तगदं दंसअन्तेण ॥ (३)

विद् । णिव्वुत्तो दाणीं दे गन्धव्वो विवाहो । ता मह दाव से अग्गहत्थं एसा क्खु कावि तुरिदतुरिदा इअ एव्व आअच्छदि ॥ (४)

---

(१) चतुरिके ! अहमिवालिखिता ।

(२) भर्त्तृदारिके ! किं भणसि अहमिवालिखितेति । ईदृशं सौसादृश्यं येन न ज्ञायते किं तावदिहैव शिलातले भर्त्तृदारिकायाः प्रतिविम्बं संक्रान्तमुत त्वमालिखितेति । *

(३) हञ्जे ! दुर्ज्जनीकृतास्मि अनेन मां चित्रगतां दर्शयता । †

(४) निर्वृत्त इदानीं ते गान्धर्वो विवाहः । तन्मम तावदस्या अग्र-हस्तम् । एषा खलु कापि त्वरितत्वरिता इहैवागच्छति । ‡

---

* ईदृशं सौसादृश्यं आलेख्यस्य त्वयेति शेषः वर्त्तते इति शेषः । येन न ज्ञायते जनेति शेषः किं तावत् शिलातले शिलोपरिभागे भर्त्तृदारिकायाः तव प्रतिविम्बं छाया संक्रान्तं पतितं शिलाया अतिमसृणत्वादि-त्युक्तिः संगच्छते उत अथवा त्वमालिखिता चित्रिता ।

† दुर्ज्जनीकृता अदुर्ज्जनः दुर्ज्जनः कृता ईदृगोद्धताचारादेवमिति भावः ।

‡ गान्धर्वः विवाहः तदुक्तं "गान्धर्वः समयान्मिथ" इति याज्ञव-

नायकः । (सस्तुति) ॥

(ततः प्रविशति चेटी ।)

चेटी । (सहर्षम्) भट्टिदारिए ! दिट्ठिआ वड्ढसि । पडिच्छिदा क्खु तुमं भट्टिणो जीमूदवाहणस्स गुरूहिं ॥ (१)

विदू । (सहर्षम्) ही ही भो सम्पुण्णा मणोरहा पिअवअस्सस्स । अहवा णहि णहि । भोदीए मलअवदीए । अथवा ण दुवेणं । (भोजनमभिनयन्) मम ज्जेव्व एक्कस्स बह्मणस्स ॥ (२)

चेटी । (नायिकामुद्दिश्य) आणत्तम्हि जुवराजमित्तावसुणा ॥ अज्ज ज्जेव्व मलअवदीए विवाहो । ता लहुं तं गेह्निअ आअच्छत्ति । ता एहि गच्छह्म । (३)

---

(१) भर्तृदारिके ! दिष्ट्या वर्धसे । प्रतीष्टा * खलु त्वं भर्तुर्जीमूतवाहनस्य गुरुभिः ।

(२) हीही भो सम्पूर्णा मनोरथाः प्रियवयस्यस्य । अथवा नहि नहि । भवत्या मलयवत्याः । अथवा न द्वयोः । ममैव एकस्य ब्राह्मणस्य । †

(३) आज्ञप्तास्मि युवराजमित्रावसुना । यथा अद्यैव मलयवत्या विवाहः । लघु तां गृहीत्वा आगच्छेति । तदेहि गच्छावः । ‡

स्फुटीवे । खचितखचिता खचितप्रकारा ("प्रकारे गुणवचनस्य कर्मधारयवच्च" इति द्विरुक्तिः) ।

* प्रतीष्टा जीमूतवाहनस्य पत्नीत्वेन स्वीकृतेत्यर्थः ।

† हीही भो इति आनन्दसूचकमव्ययं । हीही विदूषकस्य हर्षे इति प्राकृतव्याकरणम् । ममैव एकस्य ब्राह्मणस्य विवाहे बहुविधाशनव्यञ्जनादिवस्तुलाभादिति भावः ।

‡ लघु द्रुतमित्यर्थः "लघुक्षिप्रमरं द्रुत"मित्यमरः ।

विदू। गदा क्खु, तुमं दासीए धीए एदं गेह्णिअ। वअस्सेण किं इध एव्व अवत्थिदव्वं॥ (१)

चेटी। हदास मा। तुवर तुवर। तुह्माणंपि खपणकं आगदं एव्व॥ (२)

नायिका। (सानुरागं वलल्ला नायकं पश्यन्ती सपरिवारा निष्क्रान्ता)॥ (नेपथ्ये वैतालिकः ‡ पठति॥)

हृष्ट्वा पिष्टातकस्य द्युतिमिह मलये मेरुतुल्यां दधानः
सद्यः सिन्दूरधूलीकृतदिवससमारम्भसन्ध्यातपश्रीः।

---

(१) गता खलु त्वं दास्याः पुत्रि इमां गृहीत्वा। वयस्येन किमिहैव अवस्थातव्यम्। *

(२) हताश मा। त्वरस्व त्वरस्व। युष्माकमपि क्षपणकमागतमेव। †

---

* दास्याः पुत्रि इति सक्रोधोक्तिः। (पुत्रेऽन्यतरस्यामिति षष्ठ्या न लुक्)।

† क्षपणकं स्नानकाल इत्यर्थः।

‡ वैतालिकः कविविशेषः राज्ञां प्रबोधादिकार्यसूचकः "वैतालिकाः पुमान् बोधिताले बोधकरे त्रिष्वि"ति मेदिनी।

दृष्ट्वेति। पिष्टातकस्य पटवासकस्य चूर्णविशेषस्य "पिष्टातः पटवासक" इत्यमरः, दृष्ट्वा अजस्रप्रचुरविक्षेपेण इह मलये तदाख्य पर्वते इत्यर्थः मेरुतुल्यां मेरुसदृशीं रक्तवर्णामित्यर्थः मेरोः सौवर्णत्वादित्यर्थः, दधानः धारयन् जनयन्निति यावत्, सद्यः तत्क्षणात् सिन्दूर...श्रीः सिन्दूरधूलीभिः कृता जनिता दिवससमारम्भे दिनमुखे या सन्ध्या दिनयामिनीवन्धिक्षणः, तस्यां "त्रियामां रजनीं प्राज्ञस्त्यक्त्वाद्यन्तचतुष्टयं। नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" इति प्रायश्चित्ततत्त्वे। य आतपः रक्तवर्ण इति भावः तस्य श्रीरिव श्रीः शोभा येन